

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीसिद्धेश्वर्यै नमः॥ सोयमिति। आकांक्षादिसहकृततः शब्द इत्यर्थः। तत्र तयोः विध्यर्थवादयोर्मध्ये विध्यभिधा-
यकेति। अभिधायकप्रत्ययः। त्वसुकादि विभक्त्यावर्तिव्याप्तमतः विधीति विधिर्विध्यर्थः॥ विधिशब्दस्याभि-
धिप्रत्यये विध्यर्थे च प्रयोगदर्शनात्॥ अत एव अथ स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यत्वं वा
यद्विधिः सममभिव्याहृतक्रियान्वयी तदन्यान्वयी चेति॥ मणिकृदादिः कार्यत्वं वा यद्विधिरित्युक्तं तथा
चार्थविशेषाभिधायकः प्रत्ययः विधिप्रत्यय इत्यर्थः। स च लिङ् लोट्तव्यपंचमलकाररूपः समय-
पइति॥ ननु प[illegible]समभिव्याहृते लिङ्पदे विधिलेन व्यवहार अत आह॥ तद्घटितमिति॥ तद्घटि-
तं विध्यभिधायकप्रत्ययघटितं वाक्यमित्यर्थः॥ तच्च स्वर्गकामो यजेतेत्यादिकं। ननु कर्त्तावहि ध्यर्थः। न
न्वाक्येक्ये प[illegible]लिङर्थः स च प्रवृत्तिहेतुरिति चेन्न॥ तेषां व्याय मा शयाः करणस्य परनिष्ठव्यापारजनकत्वं निष्ठव्या-
पारद्वारेति नियमः॥ यथा घटं प्रति करणस्य दण्डादेः चक्रनिष्ठभ्रमिरूपव्यापार[illegible]नकत्वं स्वनिष्ठसंयोगार्जनद्वा-
रा व्यापारेण व्यापारे जनेनीयस्वनिष्ठव्यापारान्तरापेक्षणे ऽनवस्थापत्तेः अभिचारद्वारणापकरणस्येति
।अभिधारूपव्यापारसिद्धये स्वनिष्ठेति अन्यथैव साधनताज्ञानादिरूपं व्यापारमादाय सिद्धसाधनापत्तेः। त-
था च विधेः प्रवर्तकतया परनिष्ठप्रवृत्तिरूपस्वर्गादिफलकव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारेति

Accession No: - ~~270~~ M 890
Title: - तर्कप्रकाश
Subject: - न्याय
Author → ?
Date - ?
पत्र (48)

KKSU LIBRARY RAMTEK 441 106 M-890 Dist Nagpur

Checked 2012

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिङ्समवेतो लिङ्जन्योऽभिधारूपव्यापारः स्वीकरणीयः गुरुमते शब्दस्य द्रव्यत्वात् । तस्य समवायिकारणत्वाविरोधात् ॥ तन्मते लिङ्भावना द्विविधा शाब्दी आर्थी च ॥ तत्र चेयं शब्दनिष्ठत्वात् शाब्दी भावनेत्युच्यते अन्यात्वार्थी अर्थो यागादिस्तद्विषयिणी प्रवृत्तिरूपा ॥ तदुक्तं ॥ अभिधा भावनामाहुरन्यामेव लिङादयः अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचरः इति ॥ आर्थी भावना च कर्म करणमिति कर्तव्यतां चापेक्षते वृत्तिः अंशत्रयवती ॥ तथा च स्वर्गकर्मिका यागकरणिका प्रयाजादीतिकर्तव्यताकार्थी भावना इयमपि च भावनांशेन किं केनेत्थं ... उपवती किं भावयति केन कथं किं सत्कारिणमा साध्यभावयतीति तदर्थात् तथा चोक्तं लिङोऽभिधा सैव च शाब्दी भावना भाव्या च तस्याः पुरुषप्रवृत्तिः संबंधबोधः करणं तदीयं प्ररोचना चांगं तयोपयुज्यत इति संबंधबोधो लिङ्पदे शक्तिग्रहः प्ररोचना स्तुत्यर्थवादः अंगतया सहकारितयोपयुज्यते तत्र चाभिधास्वरूपसती अभिधात्वेन ज्ञाता वा न प्रवर्तिकेति प्रवर्तनात्वेन तज्ज्ञानं कारणं प्रवर्तनात्वं च प्रवृत्तिजनकत्वं ॥ यजादिपदसमभिव्याहारेण यागविषयकप्रवृत्तिजनकत्वमायातं च समानसंवित्संवेद्यतया यागे कृतिसाध्यताबोधोपि ॥ एवं इष्टसाधनताज्ञानं विना प्रवृत्तिजनकत्वं ~~[struck out]~~ स्वर्गादिमिति भावनोत्पितज्ञा

त्वेना १

त्वे कारणं भावना तच्च भाव्य जनकत्वं भाव्यत्वं चेष्टत्वं एवमभिधात्वेनापि तज्ज्ञाने कारणं अन्यथाधर्मि
ताव्च्छेदकापरिचयेन सधर्मिताव्च्छेदक [illegible] बोधानुपपत्तेः तथा च ऊँ स्वमते विध्यर्थ कार्यविशे
षको बोधः भट्टमते तु यागविषयकप्रवृत्तिजनिका अभिधा स्वर्गजनिका अभिधात्वज्ञानानुकूला प्रवर्त
नात्वज्ञानानुकूला भावनात्वज्ञानानुकूलाभिधोत्यनुकूलावेतिशक्तिचतुष्टयं अभिधाज्ञानं वैदिकप्रवृ
त्तिं प्रति हेतुः ॥ लौकिकप्रवृत्तिं प्रति तु इष्टसाधनताज्ञानं हेतुरिति बोध्यं वक्तृतत्त्व प्रवृत्तिः ऊँ द्विविधा
स्वरसवाहिनी पराधीना च [illegible] पराधीनप्रवृत्तौ प्रवर्त्तनाज्ञानं हेतुः ॥ अतएव राजाज्ञया पितुः शिरः छेदा
दौ प्रवर्त्तते ॥ शास्त्रप्रवृत्तौ वाचार्यादेः प्रवर्त्तकत्वं आचार्यप्रेरितोऽहं [illegible] मानया मि न तु स्वेच्छयेत्यनुभवा
त् ॥ ऊँ प्रवर्त्तनाच प्रवृत्तिप्रयोजकः प्रवर्त्तयितुर्व्यापारः स च चेतनस्य [illegible] रूपः । अहमेनं प्रवर्त्तयामीत्यनुभव
सिद्धः अचेतनस्य शास्त्रादेस्तु पदार्थान्तरं अभिधा भावना प्रवर्त्तनादि व्यपदेश्यं सैव च लिङर्थः ॥ तथा च
[illegible] विधिः ऊँ जैवमां प्रवर्त्तयतीति प्रवर्त्तनाज्ञापनेन यागादौ पुरुषं प्रवर्त्तयं
तीति भट्टमतनिष्कर्षः ॥ तदसत् सामान्यतः प्रवृत्तिसामान्ये इष्टसाधनताज्ञानहेतुत्वे नैवोपपत्तौ प्रवर्त्त
नाज्ञानस्य हेतुत्वे मानाभावात् राजाज्ञया पितुः शिरश्छेदादौ प्रवृत्तिरपि स्वेष्टं प्रति संध्या येव न द्विविधा

आचार्यादेश्च साक्षात् प्रवर्त्तकत्वं किं तु यान्वेनस्य प्र (२१ २) वर्त्तनं ज्ञापयितात्यायद्युक्त्या घेत तस्य वाक्ये प्र ५

यागे इष्टसाधनताज्ञानस्यावश्यम्
प्रकार ६५

जनमनुद्दिश्य मन्दोपि प्रवर्त्तते इति। एवमभिधायाभिष्टसाधनत्वे ज्ञाते [illegible] पियागे
इष्टसाधनत्वज्ञाने प्रवृत्तेः। अभिधायां इष्टसाधनत्वं यागे इष्टसाधनत्वं विनानुपपत्त्येति ✓ कत्वेष्टलतमभिधा
ज्ञानहेतुत्वम्।। न च करणस्य स्यादिति नियमादभिधासिद्धिः।। ✓ योजकत्वात्।। अनुमितिकरणव्याप्तिज्ञाना
दौ व्यभिचाराद्येति ना भिधा लिङर्थ इत्यतः प्राभाकरमतं दर्शयति।। अभिधेयविधिश्चेति। प्रतिपाद्य ✓ के
विधिः विध्यर्थ इति यावत्।। प्रागभावप्रतियोगित्वरूपकार्यत्वं न प्रवर्त्तकज्ञान ✓ त्यत आह।। तच्चेति।। कार्य
त्वं चेत्यर्थः।। शंकते किमत्रेति।। अत्र कृतिसाध्यत्वस्य विध्यर्थत्वे।। अत्वा।। समर्थः यस्य बुद्धिः पद्विषविलीब
द्धिः सप्रवृत्तिः प्रवृत्तिजनकेच्छाजनकज्ञानप्रकार इत्यर्थः। विधेरभिधेयविधेः प्रतिपाद्यः तज्जननीचेति।। कृति
साध्यत्वप्रकारकेच्छाजननी चेत्यर्थः। ननु ताहशेच्छां प्रति [illegible] ज्ञानत्वेनैव कारणत्वमास्तामत आह।। क्ल
प्तसाध्यत्वेति।। तदन्वे ✓ [illegible] ने।। कृतिसाध्यत्वप्रकारके [illegible] नुमतेरित्यर्थः।। ननु नियतपूर्ववृत्तित्वेन क्लृप्तत्वात्
क्लृप्तसाध्यताज्ञानाभावो हेतुः ननु कृतिसाध्यताज्ञानं तत्र नियमान्यथासिद्धं तयोर्द्वयोः कल्पनीयत्वे
गौरवादित्यत आह।। नचेति।। ननु क्लृप्तसाध्यत्वज्ञानाभा[illegible] हेतुरिति चेत् गौरवादिति।। क्लृप्तसाध्यत्व
प्रकारकज्ञानाभावत्वेन कारणत्वे गौरवात् लाघवात् ✓ कृतिसाध्यताज्ञान [illegible] त्वेन प्रतिबन्धकत्वे वा
वोर

कृतिसाध्य[illegible] प्रकारकज्ञानत्वेनैव नियमान्यथासिद्धयोः [illegible] कल्पना [illegible] दित्यर्थः। ननु कृतिसाध्यताभिव्यक्त्वेन कारणत्वमपि [illegible]

प ५

क्र ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सपिअपा३

प्रामाण्यनिश्चयस्योत्तेजकत्वमिति गौरवात्॥ अप्रामाण्यज्ञाने ऽप्रामाण्यज्ञानस्योत्तेजकत्वानभ्युपगमात
एतेनाप्रामाण्यनिश्चयस्योत्तेजकत्वे तत्राप्रामाण्यज्ञानसामान्यस्योत्तेजकत्वं अप्रामाण्यज्ञानस्योत्तेजकत्वे च तत्राप्रामाण्य
निश्चयस्योत्तेजकत्वमिति विपरीततो गौरवं [illegible]स्त्ववलवत्त्वं कृतिसाध्यताज्ञानप्रतिबंधकत्वे कृतिसाध्यत्वाभाववत्कृ
तिसाध्यभेदत[illegible]ग्रहतद्वच्छेदकधर्मदर्शनादीनां प्रतिबन्धकत्वापेक्षया कृतिसाध्यताज्ञानत्वेनैव हेतुत्वमुचि
तमिति॥ ननु ज्ञायमानेष्टभेदाग्रहस्यापि तन्मते कारणत्वं न स्यात्॥ तत्राप्युपभेदग्रहकारणत्वे लाघवात्॥ प
दिचनिपतत्पूर्ववर्तित्वेन [illegible]कृतत्वात तद्धेतोरिति न्यायेन कारणत्वं तदग्रहहेतोपि तु[illegible]मित्यत आह॥ सर्वदे
ति॥ तत्सत्वात्॥ कृतिसाध्यताज्ञानाभावसत्वात्॥ ननु एवं तन्मते सर्वदा भेदाग्रहसत्वात् सर्वदा विसंवा
दिप्रवृत्त्यापत्तिः॥ यदि च ज्ञायमानेष्टभेदाग्रहत्वेन कारणत्वं तदा न मापि ज्ञायमानकृतिसाध्यत्वाभावं कारण
त्वमपि सुवचमत आह॥ अतइति॥ तन्मते ऽन्यथाख्यात्यभावेन दृष्टभेदाग्रहदुःखभेदाग्रहयोर्युगपदुप
स्थितत्वेन भेदाग्रहे एव विसंवादिप्रवृत्तिहेतुः [illegible]च कृतिसाध्यताज्ञानं कृतिसाध्यताज्ञानाभा
लाघवेन कृतिसाध्यताज्ञान[illegible]त्वेनैव प्रवृत्तिहेतुत्वमिति भावः॥ केचित्तु साक्षादविरोधिनो ज्ञानस्य प्रतिबंधक
त्वजनकज्ञानविघटकत्वेनैवेति [illegible]नियमात् कृतिसाध्यताज्ञानस्य साक्षादविरोधित्वं चिकीर्षाकारण

त्ययोर्युगपदुपस्थिपा३

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतिसाध्यताज्ञानवि[घ]टकत्वेनैव प्रतिबंधकत्वमिति कृतिसाध्यताज्ञानं हेतु[रिति] ॥ ननु बाधादिवारणा-
य साक्षादविरोधित्वं विशेषणं तदर्थं श्रेयसाधनत्वाभावतद्व्याप्याद्यनवगाहित्वं तत्र प्रकृते ऽप्रसिद्धं चिकीर्षा
विषयकृतिसाध्य[त्वा]भावव्याप्याद्यनवगाहित्वात् कृतिसाध्यताज्ञानस्य ॥ बाधादिवारणाय तत्तदभावप्रतियोगित्वरूप
प्रतिबंधकत्वघटकं तदापि कृतिसाध्यताज्ञानस्य साक्षादेव विरो[धि]त्वोपगमेन साक्षादविरोधित्वासिद्धे-
रिति कथमेतत् ॥ उच्यते ॥ साक्षा[द]विरोधिनं प्रतिपत्त्यप्रतिबंधकं भवतीति जनक[ज्ञा]नविघटकं स
देव प्रतिबंधकं भवतीति नियमः ॥ साक्षादविरोधित्वं च तद्विषयाविरोध्यवगाहिज्ञानभिन्नत्वं तेन न
सत्प्रतिपक्षादौ व्यभिचारः चिकीर्षाजनकज्ञानभिन्नत्वादेव साक्षादविरोधिनीति तज्जनकज्ञानविघटकत्वेनैव
कृतिसाध्यताज्ञानस्य प्रतिबंधकत्वमिति । [प]क्षमते [सिद्ध्य]नुमितिप्रतिबंधकत्वाभावान्न तत्र व्यभिचारः ॥ सि-
द्धत्वज्ञाने[च्छा]या प्रतिबंधकत्वमितरथा हेतुप्रतिबंधकतानिवेशनीया ॥ असिद्धत्वज्ञानमेव वा हेतुः ॥ असा-
ध्यत्वज्ञानस्य च शाब्दबोधप्रतिबंधकत्वमनाभाव ॥ न च विसंवादिप्रवृत्तौ तन्मते इष्टभेदाग्रहहेतुतया तत्र
व्यभिचार इति वाच्यं संवादित्वविशेषणेन तद्वारणात् संवादिप्रवृत्तौ तन्मतेऽपि विशिष्टज्ञानहेतुरिति न कापि
व्यभिचार इत्याहुः ॥ तन्न साक्षादविरोधिनो ज्ञानस्य प्रतिबंधकत्वं जनकज्ञानविघटकत्वेनैवेत्येवं नियमस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेनाभ्युपेयत्वात् ॥ साक्षाद्विरोधिना प्रतिपक्षप्रतिबन्धकं भवति तज्ज्ञानकज्ञानविषयत्वकत्वेनैवेति नियममात्
त्साक्षाद्विरोधित्वं शरीरे च ज्ञान[illegible]त्वेत्पत्तेर्ज्ञानेति निवेशप्रहृतिसाध्यताज्ञानहेतुत्वसाधनस्य व्याप्यत्वनिर्णी-
पत्तीपत्तिरिति ध्येयं ॥ ननु कृतिसाध्यताज्ञानं चिकीर्षाद्वारा प्रवृत्तौ हेतुरिति सिद्धं एवं च जीवनयोनियत्नसाध्ये प्राणपंच
कसंचारे प्रवृत्त्यापत्तिः अथादृष्टवदात्मसंयोगेनैव प्राणपंचकसंचारोपपत्तेः जीवनयोनियत्ने मानाभावः न च भस्त्रावा
यूदीरणदृष्टान्तेन वायूदीरणत्वेन प्रयत्नजन्यत्वानुमानात्परिशेषात्तत्सिद्धिरिति वाच्यं ॥ बाह्यवायूदीरणे व्यभिचा
रात् । न च तस्यापीश्वरयत्नजन्यत्वान्न व्यभिचार इति वाच्यं । प्रकृतेपि तेनैवार्थान्तरात् । [illegible]
[illegible] जन्यत्व
विशेषणे च बाह्यवायूदीरणे व्यभिचारात् । यत्नसमर्पविस्थानां श्वासधारणे श्वासक्रियानुदयः सर्वसिद्धः । जीव
नादृष्टस्य च तदापि सत्त्वेन तदनुत्पादो जीवनयोनियत्नव्यतिरेकादिति । तन्न । तदानीं जीवनयोनियत्नानुत्पत्तिर्य
त्वयुक्ता तत एव श्वासक्रियाविरहोपपत्तेरिति मैवं । धावतः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनात् श्वासक्रि
यात्वावच्छिन्ने एव यत्नजन्यत्वनिश्चयत्वात् । यद्विशेषयोः कार्यकारणभावो सति बाधके तत्सामान्ययोरपीति न्या
यात् । जीवनयोनियत्नसिद्धिः । न च विषभक्षणव्यावर्तनाय स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्यावश्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेतुत्वात्तदभावादेव न प्राणपंचकसंचारे प्रवृत्तिरिति वाच्यं । अदृष्टकृतिसाध्यप्राणपंचकसंचारे जीवित्वात् प्राणपंच
कसंचारो मत्कृतिसाध्यः मत्कृतिं विना सत्त्वे सति मदिष्टसाधनत्वादिति च तज्ज्ञाभावादिति उच्यते चिकीर्षाधीन
कृतिसाध्यताज्ञानत्वेन प्रवृत्तिकारणत्वात् । ननु तथापि भोजनचिकीर्षाविरहकृतिसाध्ये नान्तरीयकश्रमे प्रवृत्तिप्रसंगः
४न अत्र कश्चित् चिकीर्षाधीनकृतित्वेन श्रमजनकत्वद्वेषो नियतादविश्रमो तत्रेत्याह । तन्न । शत्रुवधप्रवृत्तेः प्रति
योगिनि शत्रौ द्वेषः कारणमिति तावत् उर्वचं तस्य भिन्नविषयकतया शत्रुवधप्रवृत्तौ च हेतुत्वात् । किंतु । शत्रुवध
स्येष्टसाधनत्वेन तदिच्छाया एव तत्र हेतुत्वात् नचैवं शत्रुनिवृत्तौ शत्रुद्वेषस्य समानविषयकत्वेन हेतुत्वप्रसंग
इति वाच्यं । इष्टत्वात् । द्वेषयोनिनिवृत्तितः तस्करं नश्यतो तत्रिसंभावनापि व्याघ्रादिसमीपवृत्तिदेशाद्देवनिवृ
त्तेः । तत्र तद्देशवर्जनरूपेष्टसाधनताज्ञानात् । पलायनप्रवृत्तेश्च श्रमसंभवात् । नेप्रवृत्त्यभावरूप एव निवृत्तिरिति वाच्यं
। निवृत्त्यभाव एव प्रवृत्तिरित्यस्यापि सुवचत्वात् । न च प्रवृत्त्यभावकाले कदाचिन्निवृत्तत्वव्यवहारात् । प्रवृत्त्यभाव
एव निवृत्तिरिति वाच्यं । निवृत्तेर्द्वेषसमानविषयकत्वस्यानुभवसिद्धत्वात् । अथ निवृत्ता[illegible]यत्नस्वीकारे विषय
भेदेन प्रवृत्तिनिवृत्तियौगपद्यापत्तिरिति चेन्न । [illegible]ष्टानिष्टसाधनतासमूहालंबनसंभवेपि रागद्वेषयोरेकदासंभ
वेन तदसंभवात् नच य[illegible]त्रु ध्यात्मकं तत्स्मरणं अनंतरं फले इच्छा फलद्वेषो ततउपायेच्छा उपायद्वेषो तत्र तत्

धी ३

चे ५

स्प ३

दृष्ट

न्न अपेक्षा १ ६२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दापत्तिरितिवाच्यं। उपायेच्छाकाल एवापेक्षाबुद्धेर्नाशात्॥ उपादानप्रत्यक्षस्य साक्षात्त्वघटितहेतुतया तद
भावाच्च ज्ञानेच्छादेर्यौगपद्याभावात्। एवं च प्रयत्नयौगपद्यस्य चेष्टास्थल एव क्षतेरभावाच्च विशेषगुणत्व
वच्छेदेन विजातीयचेष्टानुरोधेन विजातीयविशिष्टप्रयत्नानां युगपदुत्पादात्। अन्यथा समवायेन विजाती
येतच्चेष्टं प्रत्यवच्छेदकतासंबंधेन कृतेर्हेतुतया एकांगुल्यामिव परत्रापि तस्या एव कृतेरवच्छेदकतया सत्त्वात्। विजा
तीयेतच्चेष्टाव्याप्यैकांगुल्यन्तरेप्यापत्तेः। नानाकृतिस्वीकारे तु एतत्कृतेरवच्छेदकतयांगुल्यन्तरे सत्त्वादेव न तत्र विजाती
ये तच्चेष्टापत्तिः। ननु समवायसंबंधेन विजातीये तच्चेष्टां प्रति स्वीयविजातीये तच्चेष्टाहेतुसाध्यत्वाख्यविषयता
निरूपितसिद्धत्वाख्यविषयतयांगुल्यन्तरेभावात्। अथ यदाङ्गुलीषु तस्यैतदंगुल्यां विजातीयचेष्टासाध्यकाकृ
तिरुत्पन्ना तदा एतत्पुरुषस्य कथं न स्यांगुल्यवच्छेदेन विजातीयचेष्टोत्पद्यत इति तत्पुरुषीयत्वनिवेशे कार्यका
रणभावकल्पने गौरवं नानाकृतिस्वीकारे तु अवच्छेदकतया अङ्गुल्यन्तरीयकृतेरेतत्पुरुषीयांगुल्यामसत्त्वादेव न तदापत्ति
रितिवाच्यं। अवच्छेदकताताद[illegible]विषयतोभयसंबंधेन कृतेर्हेतुतयाप्यापितत्पुरुषीयत्वानिवेशे। न च कृतेरनन्तवै
जात्यकल्पनेन तदवच्छिन्ननियामककल्पनेन च गौरवमिति नानाकृतिस्वीकारो निरर्थक इति मैवं अवच्छेदकताताद
त्म्यविषयतोभयसंबंधेन कृतेर्हेतुत्वे उभयत्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपस्य घटकतया तत्पुरुषीयत्वनिवे
६ शासंबंधेन कृतेर्हेतुत्वमिति एककृतिस्वीकारेपि नानुपपत्तिः। एकस्या एव कृतेर्विजातीये तच्चेष्टाहेतुसाध्यत्वाख्यविषयतानिरूपितसिद्धत्वाख्यविषय ६

१ एकविंशति ... पर ... विरह ... तया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्क० राघवं

[illegible]

नो २

त्रेणैरवा [illegible] दवच्छेदकतासंबंधेनेवहृनेर्हेतुतेति एकप्रवृत्तिस्वीकारे विजातीयचेष्टा
नामनुपपत्त्या नानाप्रवृत्तिस्वीकार आवश्यक इति दिक् । अन्ये तु उच्यते स्वचिकीर्षाधीनप्रवृत्तिसाध्यताज्ञानत्वेन प्रवृत्ति
कारणत्वात् भ्रमे स्वचिकीर्षाधीनप्रवृत्तिसाध्यताज्ञानाभावादेव प्रवृत्तेः अत एवान्याधीनेच्छा [illegible] विषयविष
यत्वादेव भ्रमो नान्तरीयक इत्युच्यते ननु प्राणपंचकसंचारे श्रमे च प्रवृत्तिवारणाय स्वचिकीर्षाधीनप्रवृत्तिसाध्य
ताज्ञानकत्वेन कारणतेत्युक्तं तदयुक्तं प्राणपंचकसंचारादेः प्रवृत्तिस्वरूपायोग्यतयैव तत्र प्रवृत्तिवारणात् किंचि
कीर्षाधीनत्वविशेषणेन अन्यथा वस्तुगत्या चिकीर्षाधीनाया प्रवृत्तेः साध्यताभ्रमात् प्राणपंचकसंचारे प्रवृत्ते
र्वज्रलेपत्वात् । तथा च प्रवृत्तिस्वरूपयोग्य [illegible] ज्ञानस्पष्टथ कारणतया प्रवृत्तिस्वरूपायो[ग्य]त्वात् प्रवृत्तिविशेष्यताप

ग ८

स सा ५

र्याप्तप्रवृत्तिसाध्यताज्ञानेनैव वारणे तया नोपपत्तौ न तद्विशेषणमिति ॥ अत्रेदं बोध्यं ॥ स्वेच्छाधीनत्वं न ज्ञाततंत्रमपि तु वस्तुग
त्या स्वेच्छाधीनाया कृतेः साध्यताज्ञानं कारणमिति प्राणपंचकसंचारे वस्तुगत्या स्वेच्छाधीनकृतेरप्रसिद्धतया कथं प्र
सक्तिः वा कारणतावच्छेदकतया तद्विशेषणानुपादानमिति न च तथापि सुखेच्छामादाय सुखे प्रवृत्तिप्रसंग इति तथा । ज्ञानका
रणत्वमावश्यकमिति वाच्यं फले ज्ञायात् प्रवर्तकत्वात् तथापि स्वचिकीर्षाधीनत्वस्य विवक्षणात् सुखचिकीर्षात्वेन तु न
प्रवर्तकत्वमिति । वस्तुतस्तु प्रवृत्तिस्वरूपायोग्यव्यावृत्तविशेष्यताप्रयासत्वात् प्रवृत्तिसाध्यताज्ञानत्वमात्रेण कारणत्वेप

४ ममादायातिप्रसंगवारणाय प्रवृत्तिस्वरूपयोग्यत्वं ज्ञानस्य प्रवृत्तिस्वरूपायोग्यव्यावृत्तविशेष्यताप्रयासत्याः साध्यताज्ञा ४

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नि १

टादौ जीवनयोनिप्रवृत्तिसाध्यताभ्रमकाले प्रवृत्त्यापत्तिवारणाय चिकीर्षाधीनकृतिसाध्यताज्ञानत्वेन हेतुतया आवश्यक
तया चिकीर्षाधीनत्वं विशेषणमावश्यकमेवेति एतेन प्रवृत्तिस्वरूपायोग्यत्वज्ञानं कारणमिति प्रवृत्तिस्वरूपायोग्यत्वात्तत्र
विशेष्यतावृत्त्यसत्त्वात् कृतिसाध्यताज्ञानं कारणमिति यन्न ब्रूमः। किंतु कृमेनेव प्राणपंचकसंचारेण प्रवृत्तिरिति तथा हि घटो

क

घट इति तद्विशेष्यतावच्छेदकाद्विधेयकशाब्दबोधवारणाय निर्वह्निमानिति तदभावधर्मितावच्छेदककतद्धर्मावच्छिन्नप्रका

प ५

रताकानुमितिवारणाय च तद्भिन्नवृत्तिविषयतासंबंधेन ज्ञानं प्रतितद्वृत्तेन हेतुतावाच्या तत्र च कार्यतावच्छेदके
ज्ञानत्वमनिवेश्य तद्भिन्नप्रवृत्तिविषयतासंबंधेन गुणत्वावच्छिन्नं प्रत्येव हेतुत्वमुपेयते एवं च प्रवृत्तिलक्षणगुणः प्रा
णपंचकसंचारभिन्न एव जायते इति प्राणपंचकसंचारभिन्नप्रवृत्तिविषयतासंबंधेन प्रवृत्तौ प्राणपंचकसंचारभेद
एव हेतुरिति नातिरिक्तकारणताकल्पनमिति चिकीर्षाधीनत्वविशेषणमफलमिति निरस्तं तावतापि घटादौ जी
वनयोनिकृतिसाध्यताभ्रमसमानाधिकरणप्रवृत्तिवारणाय चिकीर्षाधीनत्वविशेषणावश्यकत्वादिति दिक् नन्वेवमि
ति एवं कृतिसाध्यत्वमात्रस्य विध्यर्थत्वे जानत इति व्यर्थं निष्फलमपि मंडलीकरणं फलभ्रान्त्या क्रियते तस्य च प्रवृत्त्या चे
ष्टां न कुर्वीत न विप्रः क्षणिको भवेदित्यादिना वेदनिषेधात् इष्टजनकत्वेन तत्र बलवदनिष्टजनकत्वज्ञानकालेऽप्यास्ति
कानामपि प्रवृत्तिप्रसंगः प्रवर्तकस्य कृतिसाध्यताज्ञानस्य सत्त्वादित्यर्थः॥ अथेति। तथा च बलवदनिष्टाननुबंधित्वस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति कृतिसाध्यत्वं विध्यर्थ इति भावः। इत्यमपीति बलवदनिष्टाननुबन्धित्वमपि कृतिसाध्यताज्ञानस्य प्रवर्तकतया बल
वदनिष्टजनकत्वज्ञानकाले प्रवृत्त्यवारणेऽपीत्यर्थः। तच्च मण्डलीकरणे प्रवृत्तिजनकेति बलवदनिष्टाननुबन्धिकृतिसा
ध्यताज्ञानस्य सत्त्वादित्यर्थः। प्राभाकरमते इष्टसाधनत्वमपि विध्यर्थो भवत्वेव अत एव तैः नित्यापूर्वनिषेधापूर्वरूपं पूर्व
पूर्वमपि संध्यामुपासीत न कलञ्जं भक्षयेदित्यादिनित्यनिषेधयोः कल्प्यते। तस्य च स्वत एव पुरुषार्थत्वान्नेष्ट वि
रोध इति सर्वदा प्राभाकराणामेव नेदं मतमिति सूचनाय अत्र प्राभाकरमते तदेकदेशिमते तथा च तदपि एकदेशिमत
मिति भावः। नित्ये इति संध्यावंदनादावित्यर्थः। शौचादीत्यादि तत्कालजीवित्वपरिग्रहः। संध्यामुपासीतेत्यादि
स्थले अहरहरेतत्कालीनकृतिसाध्यसंध्यावंदनकः शुचितत्कालजीवित्वात् पूर्वसंध्यायामहमिवेत्याकारक
कार्यताज्ञानं प्रवर्तकमित्यर्थः। अन्यत्र चेति काम्ये चेत्यर्थः। इष्टेति काम्ये कृतिसाध्यमत्कृतिं विनाऽसत्त्वे सतिमदि
ष्टसाधनत्वादित्यानुमानिकं कार्यताज्ञानं काम्यगोचरप्रवृत्तौ हेतुरित्यर्थः। तुल्यन्यायेन कार्यतास्मरणात्प्रवृ
त्तिर्न स्यात्। आह्लादस्मरणे नानुमानिकस्येष्टसाधनताज्ञानजन्यकार्यताज्ञानस्याभावादित्यत आह। इष्ट
साधनताज्ञानकालीनं चेति। कालश्चात्र यावता कालेन व्याप्त्यादिज्ञानात् कार्यतानुमितिस्तावानेव विशिष्टया
त्यपेक्षेण न स्थूलकालमादाय दोषः। लिंगोपहितलैङ्गिकभानोपगमे तु यथाश्रुतेऽपि न दोष इति सामान्ये चेति वृत्

का ५
न

कृष्ण

१२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिसामान्ये चेत्यर्थः । यद्विशेषयोः कार्यकारणभावो ऽसति बाधके तत्सामान्ययोरपीति न्यायादिति भावः । न कश्चि
दिति मंडलीकरणेऽपि प्रवृत्तिप्रसंगरूपो दोषो नेत्यर्थः । प्रवृत्तित्वावच्छिन्नं प्रति कार्यताज्ञानत्वेनैव हेतुता काम्यगोचर
प्रवृत्तिं प्रति इष्टसाधनतालिंगककृतिसाध्यताज्ञानत्वेन नित्यगोचरप्रवृत्तिं प्रति च शौचादिमत्त्वप्रतिसंधान
जन्यकार्यताज्ञानत्वेन हेतुतया विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलोत्पादकतया विशेष
सामग्रीविरहादेव न मंडलीकरणादौ प्रवृत्तिरिति भावः । पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्वे सति मदिष्ट
साधनत्वादिति पाकानुमानं तत्र च श्रमे प्रवृत्तिवारणाय स्वेच्छाधीनकृतिसाध्यताज्ञानस्यैव प्रवर्तकतया स्वे
च्छाधीनमत्कृतिसाध्यत्वसाध्ये हेतुरपि इच्छाधीनमत्कृतिं विनाऽसत्वे सतीति तेन प्राणपंचकसंचारेण व्यभि
चारः मदिष्टसाधनत्वमात्रस्य हेतुत्वे इष्टे व्यभिचार इति सत्यंतं मदिष्टसाधने परकृतपाके व्यभिचारवार
णाय मत्कृतिं विनेत्युक्तम् तदंश्रमे व्यभिचाराद्विशेष्यदलं निवे[illegible]मदीयशत्रोरिष्टसाधनत्वाद्व्य
भिचार इत्यतः । मदिष्टेत्युक्तम् तद् अयं मदिष्टसाधने नांतरीयके जलसंयोगे व्यभिचारः श्रमवत्त्वस्यापि अन्ये
च्छाधीनमत्कृतिसाध्यत्वात् स्वेच्छाधीनमत्कृतिं विनेत्यस्य विवक्षणे च श्रमेऽपि तेने[illegible]कानतिप्रसंगात् मदिष्टत्वं वैय स्य २
र्थ्यमिति चेत् न । अन्येच्छाधीनमत्कृतिसाध्ये मदिष्टसाधनान्यत्वे सतीत्यस्यापि हेतो निविष्टत्वात् । ननु अन्येच्छाधी

स्य २ शः । तस्यापि ४

13

न्या २ धीनमत्कृतिसाध्यत्वे सतीत्येव विवक्षणे ततः एव पक्षस्यापि वारणाद्विशेष्यदलवैयर्थ्यमिति चेन्न। उपरक्ताभाव
तया वैयर्थ्याभावात् तस्येष्टत्वं तरत्वादिति। अथ सिद्धपाकस्य पक्षत्वेष्टत्वानंतरं भविष्यत्वत्पस्य कृतिसाध्यत्व
स्य बाधः। अनागतपाकस्य च सामान्यलक्षणानंगीकारात् ज्ञानासंभव इति चेन्न। पक्षधर्मताज्ञानस्य समानप्रकार
कत्वेनैवानुमितिहेतुतया पक्षतावच्छेदकपाकत्वप्रकारकसिद्धपाकविशेष्यकज्ञानादसिद्धपाकविषयकानु
मितेः संभवात् तदुक्तं मणिकृता पाके कृतिसाध्यत्वसिद्धावपि देवाधादनागतं पाकमादाय सिध्यति। पक्षता
वच्छेदकधर्मसामानाधिकरण्येन साध्यमानस्य सिद्धावपीत्यनुमाने कृतत्वादिति। ननु भाविनो विराजे प्रवृत्तिकारण
येदानीं तन्मत्कृतिसाध्यताज्ञानस्यैव प्रवर्तकतयेदानीं तन्मत्कृतिसाध्यत्वमेव साध्यं। हेतुरपि चेदानीं त्वयदिः
सत्तु सिद्धपाके संभवी। असिद्धस्य च ज्ञानात् पक्षधर्मताज्ञानं दुर्निरूपमिति चेन्न। स्वसमानाधिकरणपाकस्व
पपरे परासंबंधेन सिद्धपाक एव हेतुमत्ताज्ञानसंभवात्। न च द्रव्यत्वेन पर्वते वह्निव्याप्यधूमवत्ताज्ञानाद्द्रव्यत्वेन
ह्रदपक्षकानुमित्यापत्तिः। अन्यथा स्वाप्रतियोगित्वेष्टापत्तेस्योगादिति वाच्यम्। द्रव्यत्वप्रकारकतद्धर्मिकपक्षकानु
मितित्वकार्यतावच्छेदकद्रव्यत्वप्रकारकपरामर्शत्वेन कारणता। कारणतावच्छेदकपरं न तद्धर्मिकनिवेशः।
समानविषयत्वेन कारणत्वेऽपि तद्धर्मिकभेदेन कारणत्वस्यावश्यकत्वात्। कारणतावच्छेदकेऽपि तद्धर्मिक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निवेशास्तत्वन्मते परमाधिक्यात् ~~[struck out]~~ इत्थं च इदं व्याप्तिमनंतर्भाव्ये
वकरणत्वान्न दोषः। ननु व्याप्यताघटकसंबंधेन हेतुमत्ताज्ञानस्यैवानुमितिहेतुतया तदसंभवः। किं च कालिकेन व्यभि
चारेण स्वसमानाधिकरणपाकत्वरूपपरंपरासंबंधस्य हेतुतानवच्छेदकत्वात्। न च साध्यमपि तेनैव संबंधेनेति वा
च्यं। इष्टसाधनताज्ञानजनकचिकीर्षायां स्वरूपसंबंधेनैव कृतिसाध्यत्वस्य प्रकारकतया तज्ज्ञानजन्यानुमितेनैव संबं
धेन ~~[struck out]~~ तस्य प्रकारत्वात् स्वरूपसंबंधस्यैव साध्यतावच्छेद
कत्वादिति चेन्न। गुरुमते येन केनचित्संबंधेनैव हेतुमत्ताज्ञानादप्यनुमितिस्वीकारात् कालिकसंबंधेन पर्वते
धूमवत्ताज्ञानेप्यनुमितेरिष्टत्वात्। न चैवं पर्वते धूमवत्ताज्ञानात् धूमावयवे वह्न्यादौ वह्न्यनुमित्यापत्तिरिति वा
च्यं। पक्षतावच्छेदकभेदेनानुमितिपरामर्शयोः कार्यकारणभावोङ्गीकृतत्वाद्वह्नित्वपक्षकानुमितेरलीक
तया तदंतर्भावेन कार्यकारणभावाकल्पनात्। न च समानविशेष्यतावच्छेदकतावस्त्या कारणत्वे ला
घवात् तद्रूपत्वेन इदं पक्षकानुमित्यापत्तिरिति वाच्यं। अन्यथाख्यात्यापत्तिरिति भयेन गुरुमतेपि पक्षताव
च्छेदकभेदेन कारणत्वकल्पनात्। अथ मानाभावान्निवेशानुरोधेनापि पक्षतावच्छेदकनिवेशस्याव
श्यकत्वाच्चेति दिक्। अपरे तु संनिकृष्टपर्वतपर्वतत्वेन धूमाभाववत्ता[illegible] येन केनचित्संबंधेन धूमवत्तापराम

पत्रे १

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थादसन्निकृष्टपर्वते वन्ह्यनुमित्यापत्तेः इष्टापत्तौ च वन्ह्यर्थिप्रवृत्त्यापत्तेरेतद्धित्यपि तात्पर्यं हु स्त दसत। उपाद्य
नवत्वक्षाभावादेव तत्रप्रवृत्तिर्वा तत्संभवादिति। नैचेवमिष्टं वा इष्टसाधनताज्ञानजन्यकार्यताज्ञानत्वेन हेतुत्वे।
लाघवादिति। इष्टसाधनताज्ञानजन्यत्वापेक्षयेष्टसाधनताज्ञानकालीनत्वापेक्षया चेष्टसाधनताविषयकत्व
स्यानिवेशे लाघवादित्यर्थः॥ प्रवृत्तिसामान्ये इति। तथा च प्रवृत्तिसामान्यसामग्रीविरहादेव न मंडलीकरणे प्रवृत्ति
रिति भावः॥ नित्य इति॥ संध्यावंदनादावित्यर्थः॥ तदभावात्। तस्येष्टसाधनत्वाभावेनेष्टसाधनताविषयकक्र
तिसाध्यताज्ञानाभावादित्यर्थः॥ ननु तत्राप्यिष्टत्वश्रवणानुत्पादकत्वपे इष्टसाधनत्व [illegible] मस्त्येव यत्राविफलत्वेन
श्रूयते तत्रापि तत्कल्पत इत्यत आह साध्यत्वेति। ननु तन्निरूपितसाध्यत्वेन विरुद्धमिति चेत्तन्निरूपित
साध्यत्वेष्टसाधनतयोर्ध्याने बाधकाभावः। सामान्यतस्तु साध्यत्वसाधनत्वयोर्विरोध इत्यभिप्रेतं शंकते
कथमिति। अनयोः साध्यत्वसाधनत्वयोः। अनयोः कृतिसाध्यत्वेष्टसाधनत्वयोरित्यर्थ इति कश्चित्। साध्य
नत्वं हीति सिद्धधर्मः पूर्वकालवृत्तिधर्मः॥ अनन्य[illegible]सिद्धनियतपूर्ववृत्तित्वरूपकारणतायाः सि[illegible]धर्मत्वादित्य
र्थः। सिद्धधर्मत्वमेवाह असिद्धेति भाविनः कार्यानुदयादित्यर्थः॥ साध्यत्वं चेति अनंतरभावित्वरूपं साध्य
त्वं च असिद्धधर्मः भाविकालवृत्तिधर्म इत्यर्थः॥ अनन्यथासिद्धनियतपश्चाद्भावित्वरूपकार्यतायाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनागतहेतुत्वादिति भावः । तदेवाह सिद्धतादशायामिति । तदभावात् । साध्यत्वाभावात् नचेति । ए
ककालावच्छेदेन सिद्धत्वासिद्धत्वयोरसंभवेन तदवच्छिन्नयोः साध्यत्वसाधनत्वयोरपि सामान्यत एव
विरोधेना[illegible]न्यनिरूपितयोरपि तयोर्विरोध इति भावः । यो नैककालावच्छेदेन सि[illegible]त्वासिद्धत्वयोः संभ
वे न एककालाहृतीति । नचेदानीमिष्टसाधनम[illegible]वहृतिसाध्यमिति ज्ञानादेव प्रवृत्तिरस्त्वामिति वाच्यं । इदा
नीमपेये तत्तत्कालयोरननुगमेन तथा व्याप्तिग्रहासंभवादिति भावः । नवीनेनैयायिकमते इष्टसाधन
ताज्ञानस्य प्रवृत्तिसाध्यताज्ञानस्य च पृथगेव कारणत्वादाह गुरुरिति । लाघवादिति कारणतावच्छेदक
लाघवादित्यर्थः । एवकर्तृकमिति । इष्टत्वसामान्ये कारणमित्यर्थः । ज्ञानादीति आदिनेष्टसाधनताज्ञान
कालीनकार्यताज्ञानपरिग्रहः । गौरवादिति । जन्यत्वादिविशेषेण कारणतावच्छेदकगौरवादित्यर्थः । फलाभा
वादितीति संध्यावंदनादौ न स्वर्गादिरूपफलाभावादित्यर्थः । नित्येष्वीति । संध्यावंदनादावपीत्यर्थः । फलश्रु
तेरिति । संध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यांति ब्रह्मलोकं सनातनमित्यादिना तत्रापि फ
लबोधनादित्यर्थः । सर्वत्र नित्ये फलश्रवणाभावादाह ब्रह्म इति अत एवाह यत्रेति । नित्ये इति शेषः । वि
श्वजिदिति । विश्वजिता यजेते त्यत्र इष्टसाधनत्वमपि ध्यर्थ तेन विशेषतः फलानुपस्थितौ विधेः स्वर्गफलता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।त्वेनापवर्गस्याभावरूपतया गौरवेण लघुत्वात् स्वर्ग एव ॥१

नुपपत्त्याविशेषतः फलं कल्पनीयं तत्र च स्वर्गापवर्गयोरेव मुख्यपुरुषार्थ[illegible] फलं कल्प्यते। तथाऽश्रुतफ
ले नित्येपीति भावः। ननु पदकरणे प्रत्यवायस्त्र कल्पितमिति तत्र च प्रत्यवायपरिहारस्याप्यवश्यकत्वात् स एव फलं न तु स्वर्गो गौ
रवात् न च तस्यानिरूपाधीच्छाविषयत्वरूपमुख्यपुरुषार्थत्वाऽसंभव इति वाच्यम्। बलवद्द्वेषविषयीभावत्वेन दुःखा
भाववद् दुःखजनकाभावेपि तत्त्वाविरोधादित्यन्तस्याथे वा हि। प्रत्यवायेति। न च प्रत्य[illegible]वायपरिहारस्य प्रागभा
वः। तस्य च कथं फलत्वं प्रागभावस्याजन्यत्वादिति वाच्यम्। मत्तात्वे यत्सत्वे यदभावे यदभाव इत्येवरूपयोग
क्षेमसाधारणजन्यत्वस्य तत्रापि संभवादिति भावः। नचैवमिति। नित्येपीष्टसाधनताज्ञानबलादेव प्रवृत्तिस्वी
कारे इत्यर्थः काम्यत्वमिति। कामनाधीनकर्तृकत्वस्यैव काम्यत्वरूपत्वादित्यर्थः। नहिति· कामनानधीनकर्तृक
त्वस्यैव नित्यत्वरूपत्वादिति भावः। कर्मेति त्रिविधा नित्यं काम्यं नित्यकाम्यं च। तत्र केवलनित्यं संध्यावंदनादि।
केवलकाम्यं यागादि नित्यकाम्यमेकादशीव्रतादि अकरणे प्रत्यवायश्रवणात् नित्यत्वं। श्रुत्यादिकामनाश्रवणा
त् काम्यत्वमपि। अत एव काम्यकरणे नित्यमपि तेनैव सिध्यतीति न तत्र कर्मद्वयं। भवन्मते तु सर्वस्यैव नित्यस्य का
म्यत्वे केवलनित्यं कर्मैव न स्यात्। तथा च नित्यत्वमित्यस्य केवलनित्यत्वमित्यर्थः। अन्यथा नित्यकाम्ये कामनाधीन
कर्तृत्वेन काम्यत्वेपि नित्यत्वस्वीकारादसंगत्यापत्तेरिति ध्येयं। नहीति। कामनाधीनकर्तृकभिन्नत्वस्यानित्यत्वरूप

रूप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वे नित्यकाम्यासंध्यादौ कामनाधीनकर्तव्यत्वं नित्यकं यदिति। विहिता तत्तत्कालीनाकरणे इत्यर्थः। तेनासंध्यासंध्यावं

दनाकरणेऽपि न क्षतिः। तत्वमित्यनंतरं नित्यत्वमित्यनुषंगः। तद्धेतीति। प्रत्यवायप्रयोजकीभूताकरणप्रतियोगित्वं नित्य

त्वमित्यर्थः। कामनोपाधीति। कामनारूपो य उपाधिः प्रयोजकस्तत्कर्तव्यत्वेनापीत्यर्थः। प्रयोजकत्वं चान्यूनानति

रिक्तवृत्तित्वं। तथा च कामनाधीनकर्तव्यत्वे कामनानधीनकर्तव्यत्वस्य विरुद्धत्वेऽपि प्रत्यवायप्रयोजकीभूताकर

णप्रतियोगित्वरूपं नित्यत्वं न विरुद्धमिति भावः। नैवमिति। एवं कामनोपाधिककर्तव्यत्वे फले इति प्रथमतः। फल

ज्ञानं ततः। फलेच्छा ततः इष्टसाधनताज्ञानमुपाये। तत उपाये इच्छा ततः प्रवृत्तिरिति क्रमः। तथा चाहरहः संध्या

मुपासीतेत्यादौ। न दानफलप्रतिसंधानं। तत्र फलेच्छाभावे नेष्टसाधनताज्ञानाभावात् प्रवृत्तिर्न स्यादित्यर्थः। इष्ट

त्वादिति फलकामनाशून्यकाले प्रवृत्त्यभावस्येष्टत्वादित्यर्थः। ननु तदापि प्रवृत्तिरनुभूयते बालानामित्यत आह।

न दृष्टेति गुरुणाऽहरहः संध्या कर्तव्येति। शिक्षितैव रूपं किंचिदेतस्य फलं नत्वीति फलप्रतिसंधायैव बालानामपि प्र

सदृप्रवृत्तिरिति भावः। तथा च केवलं नित्यं नास्त्येवेति हृदयं। नन्वेवमिति। एवं नित्यस्यापि काम्यत्वे। कामनेति अ

धिकारिविशेषणत्वात् अधिकारः तथा च नित्ये शुचित्वकालजीवित्वमधिकारः काम्ये तु कामनाधिकारीति। कामना

ऽधिकारिविशेषणं स्यादित्यर्थः। तस्यादिनीति। अधिकृताकरणे हि प्रत्यवायः। यथात्र [illegible] शुचिना संध्याक

19

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ता १

रणेपि न प्रत्यवायः । अधिकाराभावात् । यथा कामनाशून्येनाकरणेपि प्रत्यवायो न तस्मात् । अधिकाराभावादित्यर्थः । यदीति । तच्च
कामनाविरहप्रयुक्ते नित्याकरणस्थले व्यक्तं तत्रं । तत्र नियमेन कामनासत्त्वेन अकरणं त्वालस्यादिप्रयुक्तमपि तत्कारे
स्येवेति भावः । कामनेति । नित्येतरकाम्ये कामनाधिकारिविशेषणं नित्ये त्वन्ये तु शुचितत्कालजीवित्वमेवाधिकार
इति कामनाशून्योपि न प्रत्यवैतीति भावः । इष्टसाधनत्वमपि लभ्यत इति इष्टेवेत्यन्वयः । प्रामाणिकत्वात् । प्रमाणसिद्धत्वा
दित्यर्थः । ननु फलहेतोरेवाधिकारतया कामनाप्यधिकारिविशेषणत्वादधिकारः । कथमन्यथा काम्यसाधनताज्ञान
स्य प्रवृत्तिसामान्ये हेतुत्वमत आह । कल्प्यतां वेति । कामनेतरेति । तथा च नित्ये कामनाया अधिकारित्वेपि कामनेतरशुचितत्का
लजीवित्वरूपयावदधिकारवतां नित्याकरणे प्रत्यवाय इति क[illegible]नाविरहकालेपि नित्याकरणे प्रत्यवाय एवेति भावः ॥
न किंचिदिति । काम्यगोचरप्रवृत्तिं प्रतीष्टसाधनतालिंगकहृति सा[illegible]ताज्ञानत्वेन । नित्ये इष्टाभावेन नित्यगोचरप्रवृत्तिं
प्रति शौचादिमत्तावति संधानजन्यकार्यताज्ञानत्वेन प्रवृत्तिसा[illegible]कार्यताज्ञानत्वेन हेतुत्वमिति गुरुतरकल्पनानुसर
णस्यावश्यकत्वे नित्येपि फलस्योपपादितत्वादिति । ननु साध्यत्वसाधनत्वयोर्विरोधादिष्टसाधनताविषयकहृति साध्यता
ज्ञानत्वेन प्रवृत्तिहेतुत्वासंभव इत्याशयेनाह । न चेति । उत्तरयति एकस्मिन्निति । एकनिरूपितयोरेव साध्यत्वसाधनत्व
योर्विरोधो नान्यनिरूपितयोस्तयोरविरोधितयोः द तनि रूपितसाधनत्वस्य कृतिनिरूपितसाध्यत्वस्य च पाके विरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिति भावः। अन्यथा साध्यत्वसाधनत्वयोः सामान्यत एव विरोधे न त्वेति विषभक्षणेऽदृष्टनिवारणायेष्टसाधनतालि
ङ्गकं कृतिसाध्यताज्ञानं प्रवर्तकं तत्राप्यदृष्टनिसंयद्धायेष्टसाधनताज्ञानकालीनं कार्यताज्ञानमेव प्रवर्तकं
च्चं तच्च साध्यत्वसाधनत्वयोर्विरोधे संभवतीति तयोर्न सामान्यतो वि
रोध इति लाघवात्सामान्यत इष्टसाधनताविषयकृतिसाध्यताज्ञानमेव प्रवर्तकमिति भावः। ननु मधुविषसंपृ
क्तान्नभोजने मरणरूपबलवदनिष्टजनकत्वज्ञानकालेऽपि प्रवृत्त्यापत्तिः कृतिसाध्यत्वस्य तत्रेष्टसाधनत्व
स्य च ज्ञानात्। मन्मते तु बलवदनिष्टाननुबन्धीष्टसाधनतालिङ्गककृतिसाध्यताज्ञानत्वेन प्रवर्तकतया द्वेषज्ञानेन तथा
ज्ञानाभावादित्यत आह बलवदिति। सुखेति॥ तृप्तिरूपेत्यर्थः। बलवदनिष्टाननुबन्धित्वं च भ्रमकाले प्रवृत्त्यापत्ति
रतस्तेनैव ज्ञापनियमादित्ययमाचेति॥ एवं च बलवदनिष्टाननुबन्धित्वज्ञानस्यान्वयव्यतिरेकानुविधायित्वे च॥ विध्य
र्थोपीति। प्रवर्तकज्ञानविषयस्यैव विध्यर्थतया बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यत्वं विशि
ष्टमेव विध्यर्थः प्रत्येकं शक्तिकल्पने नानार्थत्वापत्त्या विशिष्ट एकैव शक्तिरिति भावः। अत एवेति विशिष्टस्य विध्य
र्थत्वादेवेत्यर्थः विशेषणाभाव प्रयुक्तो बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभावस्तत्पो
विशिष्टाभावोऽस्तीत्यर्थः॥ उपपद्यत इति प्रत्येकशक्तौ च कलञ्जभक्षणे इष्टसाधनत्वकृतिसाध्यत्वरूपविध्यर्थसत्त्वात्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तारा

राजखंड

षे

सामान्यतो विध्यर्थ निषेधबोधनेबाधात्। न कलंजं भक्षयेदिति कृत्वा भक्षणे हिंसात्वनिषिद्धाचरणे चानिष्टोत्प
त्त्या। विध्यर्थ बलवदनिष्टाननुबंधित्वांशे बाधादिष्टत्वविध्यर्थनिषेधो विशिष्टे सति [illegible] स्वीकारे शक्यसम
र्थ न इति भावः। कथं तर्हीति बलवदनिष्टाननुबंधित्वस्य विध्यर्थत्वेहीत्यर्थः। श्येनेनेति। अभिचरन् वैरिवध
घ्नत्कटकामनावान् श्येनेन यजेतेत्यर्थः। विधिश्च हतिः विधिः श्याश्च बोधजनकत्व हिंसात्वेनेति। न हिंसायास्त
त्वे प्रकृतानीत्यनेन हिंसामात्रस्यैव नरकसाधनत्व बोधकत्वादिति भावः। मानेति नरकसाधनत्व बोधकप्रमा
णाभावादित्यर्थः। न च हिंसात्वमेव मानविति वाच्यं तस्य निरस्तत्वादिति भावः। ननु तर्हि नरकासाधन
तयास्तिकानामपि कथं न तत्र प्रवृत्तिरत आह। श्येनाद्वेति। आस्तिकानां नरकभीरूणां तथा च श्येनस्य साक्षा
न्नरकासाधनत्वेपि नरकप्रयोजकत्व इति संधानादेव न तत्रास्तिकानां [illegible]
[illegible] प्रवृत्तिरिति भावः। कथं मानं भाव इति [illegible] कतेन न च इति। हिंसाचेत्यर्थः। नरकेति। न हिंसायास्त
त्वे प्रकृतानिष्टत्वनेन नरकजनकत्व बोधनादिति भावः। विनष्टेइति गवि विनष्टे सतीत्यर्थः। तत्कर्तुः। कूपकर्तुः। गो
वधेति कूपकर्तुर्गोहिंसकत्वापत्त्या तस्यापि गोवधप्रायश्चित्तापत्तेस्तत्र भावनया न कस्यापि कूपकरणे प्रवृ
त्तिः स्यादिति भावः। तदिति मरणानुकूलव्यापारत्वमित्यर्थः। [illegible] मरणोद्देशेन खड्गपातस्तेन च मरणं नाजनि
त तथापि हिंसकत्वापत्तिरतो मरणानुकूलव्यापारत्वमिति तदर्थोपि मरणोप्यायकव्यापारत्वं तथा च कूप [illegible] दे

सा-चेत

रघ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विध्यर्थप्रत्येकमेवेति इष्टसाधनत्वस्य कृतिसाध्यत्वस्य च नञर्थान्वये बाधापत्तेः। विशिष्टरूपेण शक्तौ तु बलवदनिष्टा
ननुबन्धित्वरूपविशेषणाभावात् तद्विशिष्टाभावसंभवात् तत्रैव शक्तिरुचितेत्यत आह। नकलंजमिति। तस्य क
लंजभक्षणस्य कार्यत्वात् कृतिसाध्यत्वात्। दृष्टेति तथा चायोग्यत्वात् तद्‌यान्वयार्थान्वय इति भावः। तर्हि कथं विध्य
र्थाभावबोधनमत आह। किं त्विति॥ न हिंस्यादिति विध्यर्थाभावो नञा बोध्यते भवन्मतेपि यावद्विशेषणाभा
वात् विशिष्टाभावसंभवात्। तथा च यत्किंचिद्विध्यर्थाभावबोधनेनैव सामंजस्यमिति भावः। विशिष्टरूपेण शक्तौ श्ये
नो वधसाधनं न तु नरकसाधनमिति तत्र विध्यर्थबाध उपपादितः। श्येनादौ वधाच्च नरकमिति प्रतिसंधानाच्चेति
कालं न तत्र प्रवृत्तिरित्युक्तं तत्तु न सम्यक्। बलवदनिष्टजनकत्वस्य विध्यर्थत्वे विध्यर्थे बाधासंभवेपि आस्ति
कानां कथं तत्र प्रवृत्तिः प्रवर्तकस्य बलवदनिष्टाजनकत्वज्ञानस्य तत्र सत्त्वाद्बलवदनिष्टाप्रयोजकत्वज्ञान
स्य प्रवर्तकत्वे च बलवदनिष्टाप्रयोजकत्वस्यैव विध्यर्थत्वे न कथं न तत्र विध्यर्थबाध इत्यभिप्रेत्य प्रत्येक
रूपेण शक्तौ विध्यर्थबाधमुपपादयति। श्येनेनेति बाधादिति बलवदनिष्टाप्रयोजकत्वरूपस्य तस्य बा
धादित्यर्थः। अबाधादिति बाधाभावरूपयोग्यत्वासत्त्वादित्यर्थः॥ ननु बलवत्त्वमनिष्टे दुर्निरूपमत आ
ह संक्षेप इति। नान्तरीयकश्रमं दुःखं बलवत्त्वमानुभाविकमित्यादि। रागिणं तु नरके बलवत्त्वाय ह्य नतत्रप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टाननुसंबंधित्वज्ञानस्यप्रतिबंधः ।

...कत्वेप्रामाण्यनिश्चयत्वेनोत्तेजकतया तदभावव्याप्यतदभावावच्छेदकधर्मदर्शनादीनां च प्रतिबंधकत्वेन
गौरवमनन्यसिरसोवाकारेण दर्शितः । विद्यमानेति विद्यमानायाः इच्छातद्विषयोरिष्टसाधनत्वधिस्त्वर्थः ॥ स्वरूप
सदितिवा त्वगतप्राय इच्छाविषयः तत्साधनता ज्ञानं कारणमित्यर्थः । तस्यापि इच्छाविषयत्वस्यापि एवं चेतिन
स्वगत्या यत दृष्टं तत्साधनताज्ञानं कारणमितिस्वत्वा कृ विच्छाश्रून्यकाले नपाकादाविच्छोदय इति नन्तु । ब
लवदनिष्टाननुबंधीष्टसाधनता ज्ञानानां प्रत्येकरूपेण हेतुत्वे विधिषु लाघवाविशिष्टएव शक्तिरास्तामत
आह । विध्यर्थोपीति प्रवर्त्तकज्ञानविषयस्यैव विध्यर्थं तया येनरूपेण ज्ञानस्य प्रवर्त्तकता तेनैवरूपेणश
क्तिरिति भावः ॥ ननु येनरूपेण प्रवर्त्तकता तेनैवरूपेण शक्तिरित्यत्र मानाभावात लाघवाद्विशिष्टमेवशक्य
मस्तित्यत आह ॥ नन्विति विशिष्ट बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसाध्यत्व
विशेषणेति बलवदनिष्टाननुबंधित्वविशिष्टकृतिसाध्यत्वे [illegible] शक्ति उत कृतिसाध्यत्वविशिष्टबलवद
निष्टाननुबंधित्वविशिष्टेष्टकृतिसाध्यत्वेवेति विनिगमनाविरहात अवच्छेदकगौरवाच्च प्रत्येकरूपेणैव
शक्तिरिति भावः ॥ ननु कलंजभक्षयेदित्यत्र कलंजभक्षणे विध्यर्थस्याभावे विवक्षणीय [illegible] धनी यः = १
X इष्टसाधनत्वे च बलवदनिष्टाननुबंधित्वविशिष्टकृतिसाध्यत्वविशिष्टे इष्टसाधनत्वे इष्टसाधनत्वविशिष्टबलवदनिष्टाननुबंधि बंधित्वविशि

इष्टसाधनत्वविशिष्ट ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिसाध्यताज्ञानत्वादिना कृतिसाध्यताज्ञानत्वेन इष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धित्वज्ञानत्वेनैव हेतुत्वमस्त्वित्यर्थः । लाघ
वादिति बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वकृतिसाध्यत्वे त्रितयत्वेकरूपेण हेतुत्वे गौरवात् । विशिष्टस्यैवाङ्क्तिः विशिष्टरूपेणैव
हेतुत्वमित्येककार्यकारणभावेनैव निर्वाह इति तात्पर्याभिप्रायः । स चावच्छेदकताया आसज्यवृत्तित्वानङ्गीकारात् निष्फले विशेषणवि
शेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयापादकतया अवच्छेदकगौरवाच्चासंभवी ति अवच्छेदकत्वाघटकात्पर्येकरूपेणैव
हेतुत्वमुचितमिति भावः । चिकीर्षाविशेषज्ञानस्य प्रवृत्तिहेतुतावच्छेदकचिकीर्षात्वावच्छिन्नं प्रति न विशिष्टरूपेण हेतुत्वं किंतु कृतिसाध्यताज्ञान
त्वेनैवेत्याह वस्तुतस्त्विति । चिकीर्षां प्रतीति । चिकीर्षात्वावच्छिन्नं प्रतीत्यर्थः । इच्छायाः स्वसमानप्रकारकधीसाध्यत्वनियमात् कृतिसाध्य
त्वप्रकारकेच्छां प्रति कृतिसाध्यत्वप्रकारकज्ञानत्वेनैव हेतुत्वं न तु त्रितयत्वेकरूपेण विशिष्टरूपेण वा तेन रूपेण हेतुत्वे गौरवात् । प्रमा
भावाच्चेति भावः । नन्वेवमिति । एवं कृतिसाध्यताज्ञानत्वेनैव चिकीर्षात्वावच्छिन्नं प्रति हेतुत्वे इष्टाजनकेऽपि कृतिसाध्यताज्ञानस्य तत्रापि स
त्वादिति भावः । स्यादेवेति । इष्टसाधनत्वाज्ञाने चिकीर्षा भवत्येवेत्यर्थः । तथा चेष्टापत्तिरिति भावः । सीक्तेऽपि इष्टेति मण्डलीकरणे इष्टसाधनत्वभ्र
मकाले चिकीर्षा भवत्येव अनिष्टजनकत्वेन ज्ञाते इति मण्डलीकरणे फलतश्चिकीर्षानापादयितुं शक्यते सुखादि चिकीर्षां प्रति सुखा
दिज्ञानत्वेन हेतुत्वादिति उपायतया आपादनीया सा तु न संभवति विशेषसामग्र्याः फलेजनकत्वे सामान्यसामग्र्याः सहकारिता
दित्यत आह उपाये चेति उपायेच्छायाः सामान्यसामग्री तस्या अभावादित्यर्थः । शङ्कते केचिदिति इष्टेति । कृतिसाध्येष्टसाधना
विषयानुरोधेन उपायेच्छात्वावच्छिन्नं प्रति इष्टसाधनताज्ञानत्वेन तत्वेन बलवदनिष्टाननुबन्धित्वज्ञानत्वेन हेतुत्वं सुखादौ चि
कीर्षानुरोधेन च चिकीर्षात्वावच्छिन्नं प्रति कृतिसाध्यताज्ञानत्वेन हेतुत्वं मण्डलीकरणे चिकीर्षा जायमाना उपायतयैव स्यात्
सा च न संभवति उपायेच्छासामान्यसामग्र्यभावादित्यर्थः । बलवदनिष्टाननुबन्धित्वज्ञानवाधितिबन्धकमिति बलवदनि

ते

या ४

२८

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शेनानुष्ठीयमानत्वान्नात्मकर्तृको वधकर्तृत्वमिति भावः । तत्वापत्तेः हिंसात्वापत्तेः । तथाच तस्यापि आत्मवधकर्तृत्वापत्तिरिति भावः । अ
दृष्टेति तथाच मरणोद्देशेनानुष्ठीयमानत्वे सति अदृष्टाद्वारामरणानुकूलव्यापारत्वं हिंसात्वं विसध्वस्तस्य वपाकस्यादृष्टद्वारामरणानु
कूलत्वेन न हिंसात्वमिति भावः । तर्हीति । अदृष्टाद्वारामरणानुकूलत्वस्य विवक्षितत्वे हीत्यर्थः । कथमिति । श्येनेन हिंसाहतमरणं
जन्यते किन्तु कर्मान्तरेण तथा च तत्रादृष्टस्वीकारस्यावश्यकत्वात् अदृष्टाद्वारामरणानुकूलत्वरूपं न हिंसात्वमिति तत्र बलवे
दनिष्टाननुबन्धित्वस्याक्षततया श्येनेनाभिचरन् यजेतेति विधेः प्रामाण्यमिति । दिक् । प्राचीनमते । स्वरसमुकाशयन्नवी
नमतमाह । नव्यास्त्विति विनिगमनाविरह इति तथा च बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वविशिष्टकृतिसा
ध्यताज्ञानत्वेन हेतुत्वे नोभयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण न विशिष्टरूपेण कारणत्वमिति भावः । न च वि
शिष्टस्य विशिष्यमिति न्यायेन नावच्छेदकत्वं येन विशेषणविशेष्यभावे विनिगमनाविरहः स्यात् किं त्वेकत्र द्वयमिति न्या
येन सर्वेषां विशेषणानां ज्ञाने विशिष्टत्वे अवच्छेदकतायां व्यासज्यवृत्तित्वांगीकारादिति वाच्यं । नानासंबंधावच्छि
न्नावच्छेदकतायाः एकस्या असंभवात् । महानसीयवह्न्यभाववति योगितावच्छेदकतायाः एकस्या महानसीयत्ववह्नित्वे
च स्वीकारे महानसीयत्वे समवायसंबंधावच्छिन्नावच्छेदकत्वमुतीत्यापत्तेस्तस्या व्यासज्यवृत्तित्वस्य च कुमशक्यत्वादिति दि
क् । संकते अस्त्विति । तेन तेनाप्येति बलवदनिष्टाननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यताज्ञानत्वे न कृतिसाध्यत्वविशि
ष्टबलवदनिष्टाननुबन्धीष्टसाधनताज्ञानत्वेन बलवदनिष्टाननुबन्धित्वविशिष्टकृतिसाध्यत्वविशिष्टेष्टसाधनताज्ञा
नत्वेन दृष्टसाधनत्वविशिष्टकृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धिताज्ञानत्वेनाविरुद्धेन हेतुत्वमित्यर्थः । तर्हीति हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ यथा व्रीहीन्प्रोक्षतीत्यादौ स्पर्शाद्यप्राप्ता व्रीहीन्प्रोक्षतीत्यत्र विधिः पाक्षिके सति नियमः ... नियमविधिरित्यर्थः ॥ २×

त॰१ हत्यनुपपत्तिरिति । तदयं विधिं निरूप्य[illegible] इमाम् अगृभ्णन्रशनामित्यश्वाभिधानीमादत्ते इति । तदुक्तमिति अत्यंतमप्राप्तौ विधि-
रपूर्वविधिरित्यर्थः यथा व्रीहीन्प्रोक्षतीति पूर्वापरस्यावघातेनेव नखविदलनेनापि संभवात् पक्षे अवघातस्याप्राप्त्या अवघातेनैव तुषो-
प[illegible] कर्त्तव्यो न तु न[illegible] विदलना-
दिनेति नियम्यत इति व्रीहीनवहंतीति नियमविधिरित्यर्थः तत्र चान्यत्र च प्राप्तौ यत्र नियम्यते सा परिसंख्या यथा पंचनखा-
नां सर्वेषां भक्षण प्राप्तौ पंच पंचनखा भक्ष्या न त्वन्ये इति नियम्यते इति पंच पंचनखा भक्ष्या इति परिसंख्या विधिरित्य-
र्थः ॥ शशकः शल्यकी गोधा खड्गी कूर्मश्च पंचमः इति पंच पंचनखा बोध्याः ननु याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धन-
मर्जयेदिति नियमविधिस्थले न तावद्धनार्जनं विधीयते । तस्य रागप्रा[illegible]त्वात् । नाप्यर्जनेयाजनाद्यन्वयोऽप्युपायान्त-
रस्यापि रागप्राप्तत्वात् किं तु प्रतिग्रहोपायान्तरनिषेध एवात्र विधेयः ॥ एवं परिसंख्यायां पंचपंचनखभक्षणस्य
रागप्राप्तत्वात्तदितरपंचनखभक्षणनिषेध एव विधेय इति इतरव्यवच्छेदकत्वाविशेषान्नियमपरिसंख्ययोः को
विशेष इति अत्राहुः यत्र क्रियायां विकल्पेन कारकान्वयः स नियमः यथा धनार्जने याजनप्रतिग्रहाध्यापनानामेकस्या-
र्जनस्यासंभवात् एकस्या धनार्जनक्रियायां याजनादीनां मि[illegible]तानाम[illegible]संभवात् पर्यायविकल्पेनैवान्वयः । शशका-
दीनां मानिर्दिष्टस्यैकस्यापि [illegible]स्यासंभवात् भक्षणक्रियायां मिलितानामन्वयसंभव इति परिसंख्येति भेदः ॥ तदुक्तं

लि२ नर२

लि१

नियमः पाक्षिके सतीति केचित्तु इतरव्यवच्छेदस्यार्थत्वशाब्दत्वाभ्यां नियमपरिसंख्ययोर्भेदः तथाहि। अर्जने उपाययत्र
यसंबंधस्य शाब्दत्वं सतीतो हि कृष्यादीनामन्वयोर्थात्सिध्यति येषामेकोपायेनान्वयः तेषां समुच्चयासंभवात् तत्रेतरोपायव्यु
दासे शब्दतात्पर्यं कल्प्यते परं तु धूपोस्तीति वाक्ये वन्हेरिव तस्यार्थार्थत्वं परिसंख्यायां तु भक्षणक्रियायां पंचाना
अपञ्चनखान्वयसंभवादितरपंचव्युदासो नार्थः तत्र पंचानामपि समुच्चयसंभवात् किंतु शाब्द एव एवं भक्षपंचनख
पदयोर्विधिलक्षणया [illegible] चेतरे पंचनखा न भक्ष्या इति वाक्यार्थः। तथा च उपस्थितपदार्थपरित्यागादनुप
स्थितपदार्थकल्पनादभावविधित्वाच्च नियमापेक्षया दोषत्रयवती परिसंख्येत्याहुः। तच्चिंत्यं याजनादिज
न्यार्जने इतरव्यवच्छेदस्यार्थत्वे [illegible] पि कृष्यादिकमर्जयेदित्यस्याप्राप्तावनियमेपि इतरव्यवच्छेदस्य शब्दत्वाव
श्यकत्वात्। इतरथा तु कृष्यादिकमर्जयेदेव तत् याजनार्जने तत्संबंधकुदासाभावादिति नेष्टसाधनत्वादेर्वि
धेः सौ क्रिः किंतु कार्यत्वमेवेति प्राभाकरमतमाह। अथ गुरवः इ[illegible]तितस्य इष्टसाधनत्वस्य बोधनाशक्य
त्वमेवाह। तथाहीति स्वर्गकामस्येति स्वर्गकामस्य यदिष्टं तत्साधनं याग इति अनेन विधिना बोध्यं बोधनीयं ननु
विधिना सामान्यत इष्टसाधनत्वे बुद्धेपि कुतः स्वर्गरूपेष्टसाधनत्वबोध इत्यत आह इष्टं चायेति स्वर्गएवेति स्वर्गका
मपदसमभिव्याहारात् स्वर्गरूपमिष्टं सिध्यति प्रतीतिरिष्टेन पदार्थैकदेशयोर [illegible] भेदान्वयस्वीकारेतु स्वर्गत्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नतथाच स्वर्गो मे त्विष्टसाधनं याग इति बोधमिति भावः ॥ नचेदमिति स्वर्गसाधनं याग इति बोधयितुं न शक्य
मित्यर्थः । साक्षात्साधनत्वस्य साक्षात्स्वर्गसाधनत्वस्याऽविनाशित्वेन तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेनासं
भवादिति यागस्येच्छाविशेषात्मकतया तृतीयक्षणे नष्टतया कालांतरभाविस्वर्गाव्यवहितपूर्ववृत्तित्वासंभ
वादित्यर्थः । नचेति साधनत्वं हि । द्विविधं साक्षात्परंपरया चेति साक्षात्स्वर्गसाधनताया बाधेपि परंपरास्वर्गसा
धनताबोधे बाधकाभाव इति भावः ॥ परंपरेति परंपरया स्वर्गसाधनत्वं हि स्वर्गसाधनापूर्वसाधनत्वं तच्चैका
मो यजेतेति वाक्यप्रवृत्तिः पूर्वमपूर्वानुपस्थित्या दुर्ग्रहमिति भावः । कृतिसाध्यत्वमपि न विध्यर्थ इत्याह ॥ ना
पीति कार्यत्वं । कृतिसाध्यत्वं न विध्यर्थः स्वर्गकामी [illegible] ति इष्टसाधनत्वस्य विध्यर्थत्वे स्वर्गकामस्ये
ष्टसाधनं बोधः कृतिसाध्यत्वस्य विध्यर्थत्वे तु स्वर्गकामीयकृति[illegible]साध्यो याग इति बोधनीयः तच्च न संभवतीति भा
वः तदेवोपपादयति । तथाहीति शाब्दे शाब्दबोधे बाधाभावस्य योग्यतात्वेऽप्युक्तानुपयोग इत्यत आह योग्य
ताचेति अतएव अन्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वादेव तद्योग्यमिति पयसा सिंचतीति वाक्यं योग्यमित्य
र्थः । नास्तीति सेकान्वयप्रयोजकद्रवद्रव्यत्वं नास्तीति तदयोग्यं वह्निना सिंचतीति वा[illegible]मयोग्यमित्यर्थः न
न्वस्तु शाब्दबोधे योग्यताज्ञानं कारणं आसत्तिश्चान्वयप्रयोजकरूपवत्त्वमेव योग्यता ततः किमत आह ॥

श्रु २

पा स्वर्गो

ते धार्थे

त्वे

स्म

२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२३

उक्तं तेचेति स्वर्गकामो यजेतेत्यत्र च कामीति। [illegible] उक्तेति साधनत्वस्यान्वयप्रयोजकं रूपं इष्टसाधनत्वमेवतद्दृष्टे एव
च कामिकार्यत्वस्य विधिशक्तिग्रहः स्यात् बोधो न भवेत् न च तत्र इष्टसाधनत्वे गृहीते ज्ञा कंइत्युक्तमिति। अनाशु
विनाशित्वात् साक्षात्साधनत्वस्य परंपराघटकापूर्वानुपस्थितत्वाच्च परंपरासाधनत्वस्याग्रहीतुमशक्यत्वादितु
क्तमित्यर्थः। स्वमतं आह। तस्मादितिइष्टसाधनत्वस्योक्तेति साधनत्वस्य बोधयितुमशक्यत्वाद्विध्यर्थत्वासं
भवादित्यर्थः कार्यमिति कार्यमेव विध्यर्थः। तच्चेष्टहेतोः पूर्वमेव पर्यवस्यतीत्यर्थः। अन्वयप्रकारकमे
वाह। तस्मिन्नेवेति कार्यरूपे विध्यर्थे विषयतयैवेति यागविषयकं कार्यमिति बोध इति भावः अनुपस्थि
तत्वादिति पूर्वमनुपस्थितत्वे पूर्वत्वव्याघातः अपूर्वत्वं हि पूर्वमप्रतीतत्वमिति भावः। तत्र कार्ये पूर्वे शक्तिग्र
हः विधिशक्तिग्रहः अथेति न लिङः कार्ये पूर्व एव शक्तिः किंतु कार्यत्वेन रूपेण घटपटादिरूपकार्यसामा
न्य एव च शक्तिग्रहः। ननु विधिजन्यबोधे कार्यत्वेन घटादेरेव भानापत्त्या कथमपूर्वप्रतीतिरत आह योग्यतेति
न हीति अन्वयी इति घटादिरूपकार्यस्य यागविषयकत्वाभावादिति भावः। स्वज्ञानादेरपीति स्व[illegible]त्व
दीयज्ञानस्य यागविषयकत्वात् तथा च कथमपूर्वलाभ इति भावः। कार्य इति कार्यत्वरूपेण घटपटादावे
व शक्तिग्रह इत्यतः यागविषयकं कार्यमिति बोधे स्वर्गकामस्यापि। नियोज्यनियोजकभावसंबंधेन कार्येऽन्वयाद

रा०म

30

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वलाभः। ननु किं नियोज्यत्वं किं नियोजकत्वमत आह। नियोजकत्वं चेति। तत्कामीति स्वर्गकाम इत्यत्र साध्यत्वेन प्रतीयमा
नत्वं कृतिसाध्यत्वे चापूर्वे यागद्वारा नन्तु [illegible] कामिकार्यतया प्रतीयमानत्वं ज्ञानादावपि संभवतीत्यत आह। तदी
ति सुखादेरपि कार्यत्वेन प्रत्ययाऽङ्क्तकामादन्यदिति [illegible] वेतीति तन्मते तन्वयप्रयोजकरूपवत्वस्येव योग्यतात्वेन यो
ग्यतायां इष्टे भानात्साध्यत्वसाधनतयोर्विशेष्यविशेषणभावेऽपि कामिकार्यत्वान्वये इष्टसाधनताज्ञानविशेष्यत्वस्ये
वान्वयप्रयोजकतया काम्यसाधनताज्ञानस्यैवावच्छेदकतया स्वज्ञानादेः स्वर्गसाधनतयाज्ञानात् तत्र कामिका
र्यतया प्रतीतिः ननु ज्ञानादेरपि इष्टसाधनत्वं काम संभवात्कामिकार्यतया प्रतीतिः संभवत्येवेत्यत आह। न चेति
काम्यसाधनज्ञानादिकाम्यसाधकत्वे न ज्ञाते इत्यर्थः। ननु प्रमादिरदे [illegible] त्रमः स्यादेवेत्यत आह। न चेति अन्य
थेति। ननु तथापि ज्ञानस्यापि स्वर्गसाधनतया तत्ज्ञानसंभवेन कामिकार्यतया प्रतीतिसंभवात्कथन। तत्र
योग्यतेत्यत आह। न चेति न हीत्यर्थः। यागेति स्वर्गकामनियोजकं स्य यागविषयकं कार्यमित्यन्वयबोधह
ति भावः प्रतिमंतार्थकमुख्यविशेष्यकबोधाभिप्रायेणाह स्वर्गकाम इति [illegible] कार्यवत्वं च नियोज्य
[illegible] नियोजकभावलक्षणसंबंधेन योग्यतये। ति स्वर्गकामनियोजकस्य यागविषयककार्यस्यान्यस्या
संभवेनापूर्वलाभ इत्यर्थः। ननु कामिकार्यतान्वये इष्टसाधनत्वस्यान्वयप्रयोजकतया पूर्वेनुपस्थित्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रेष्टसाधनताज्ञानासंभवात् कथं स्वर्गकामनियोज्यकं यागविषयं कार्यमिति शाब्दिको बोध इति चेत्। नहि
बोधनीये योग्यताज्ञानं कारणं किंतु तत्पदार्थतावच्छेदकावच्छिन्ने यत्र कुत्र चित्तत्र ज्ञानं मृग्यते। तच्च पचेते त्या-
दौ कामिकार्ये इष्टसाधनत्वावगमादक्षतमिति। ननु पदार्थस्य पदार्थयोग्यतायां वा शाब्दबोधे भानमुपेयते तत्रे-
ष्टसाधनत्वस्य स्वर्गकामनियोज्यत्वघटितयोग्यतात्वेन कथमिष्टसाधनत्वमविषयीकृत्य तज्ज्ञानमिति चेत्तस्य
त्वं स्वर्गसाधनीभूतापूर्वसाधनत्वमेव हि यागे स्वर्गसाधनत्वमित्यपूर्वे स्वर्गसाधनत्वभानस्य स्यावश्यकतया
शाब्दबोधे उपस्थापितस्यापि अर्थाध्याहारवादितन्मते भानोपगमात् न हि प्रथमोत्तेरपि यागविषयककार्ये स्वर्गसाध-
नत्वबोधो नाभ्युपेयत इति किंतु अस्थिरत्वात् क्रियायां कृतिसाध्यतान्वयात्। प्रागिष्टसाधनताबोधो न संभवती-
ति तन्मतनिगर्वः। अथ स्वर्गसाधनं स्वर्गकामनियोज्यकं योगविषयकं कार्यमिति शाब्दिको बोध इति तन्म-
ते सिद्धं तच्च न संभवति अन्वयप्रयोजकरूपवत्त्वरूपहेतुयोग्यताज्ञानस्य शाब्दबोधहेतुतया कथं युगपदे-
वैतद्बोधः। स्वर्गसाधनत्वबोधानंतरं कृतिसाध्यत्वस्य बोध इति तन्मतनिगर्वः तन्मते हि असंसर्गाग्रह-
सहितोपस्थितेरपि विशिष्टबुद्धिकार्यकारितोपगमात् स्वर्गसाधनत्वस्वर्गकामनियोज्यत्वादीनां पूर्वमुपस्थि-
तानामसंसर्ग [illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible] यद्बलादेव शाब्दबोधे ज्ञानसंभवात् तद्योग्यताविषयकतत्पदार्थवि
षयकशाब्दबोधस्य तन्मते त्वीकत्वादिति ननु तथापि साध्यत्वसाधनत्वयोर्विरोधान्न कथं स्वर्गसाधनत्वकृ
तिसाध्यत्वयोरपूर्वे एकज्ञानविषयत्वेन तु यागे इति चेत् । वैदिकस्थले एकविशिष्टे परान्वय इति हि उ
त्सर्गः । उद्देश्यतावच्छेदकसमानकालीनत्वं विधेये भासते इत्यपि नियम इति । इष्टसाधनत्वमुद्देश्यता
वच्छेदकीकृत्य कृतिसाध्यत्वस्य विधेयतया भानं न संभवति सिद्धस्य धर्मः साधनत्वम् असिद्धस्य ध
र्मः साध्यत्वमिति वक्तुरेकं विशिष्टे परं वैशिष्ट्यमिति न्याये नेष्टसाधनत्वकृतिसाध्यत्वयोर्भानासंभवे वि
एकत्र द्वयमिति न्यायेन यागविषयकं कार्यं इष्टसाधनमित्यन्वयबोधे बाधकाभावः । आख्यातार्थमुद्दे
श्यतावच्छेदकीकृत्य बोधानुपगमात् अन्यथा पचनं गच्छतीतिवत् पचति गच्छतीत्यत्रापि शाब्दबोधापत्तेः ।
न चैवं यागेपि इष्टसाधनत्वकृतिसाध्यत्वयोरेकत्र द्वयमिति न्यायेन भानसंभवेन कथं यागमादाय तयो
र्विरोध इति वाच्यं अत्र यागेष्टकृत्यर्थतयापत्तत्याप्यर्थान्वितस्वार्थबोधकत्वनियमेन एकवि
शिष्टे परवैशिष्ट्यमिति न्यायेनैवान्वयबोधस्य व्युत्पत्तिसिद्धत्वात् न त्वेकत्र द्वयमिति न्यायेनापि अत एव ति
लकी कर्म कुर्वीतेत्यादौ तिलकविशिष्टे कर्मकरणवैशिष्ट्यमिति न्यायेनैव बोधोदयात् कर्मकरणे नियमेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिलकसमानकालीनत्वभानात् तिलकस्यन्मकालीनकरणस्य नैष्फल्यं यदि चैकत्रद्वयमिति न्यायेनापि शाब्दबोधद्
[illegible]यते तदा तस्य नैष्फल्यानुपपत्तिरिति आस्तां तावत् [illegible]दकशाब्दबोधानुपपत्त्या च विधिद्वयं तत्र [illegible]लि एकं त्र
द्वयमिति न्यायेन बोधे बाधकाभाव एव । न च वर्षजपं विदं स्तोत्रमनुत्तमं तु च वान्भवेदिस्मदेवत्वाभावसमानका
लीनत्वं वृत्ते बाधितमिति कथं विशिष्टे वैशिष्ट्यमिति न्यायेन बोधोत्पत्तिरिति चेत् तत्र न स्तो विरोधिलक्षयावृत्त विरो
धिनीवृत्तेच्छा अर्थः स्वविषयसिद्धत्वस्येच्छाविरोधित्वात् तत्र च वृत्तेच्छासमानकालीनत्वं वृत्ते भासत इति काप्यनु
पपत्तिरिति दिक् । अत्र स्वर्गकामो यजेतेत्यादौ प्रथमतः यागविषयकं कार्यमिति प्रथमो बोधः । यागविषयकं
कार्यं स्वर्गसाधनमिति द्वितीयो बोधः स्वर्गसाधनं यागविषयकं कार्यं स्वर्गकामनियोज्यकमिति तृतीयो बोधः
स्वर्गसाधनं स्वर्गकामनियोज्यकं यागविषयकं कार्यं स्वर्गकामकृतिसाध्यमिति तुर्यो बोधः । ततश्च पूर्वेकृ
तिसाध्यत्वयागेष्टकृतिसाध्यत्वविनानुपपन्नमित्यनुपपत्तिज्ञानसहकारेण स्वर्गसाधनं स्वर्गकामनियोज्यको
यागः । स्वर्गकामकृतिसाध्य इत्यौपादानिको यागविशेष्यकः पंचमो बोधः स एव चाव वर्त्तकः उपादानमनु
पपत्तिज्ञानं तत्सहकृतशाब्दजनितो बोधः औपादानिक इत्युच्यते । इति केचिदाहुः । काम्यसाधनता
धी[illegible]जन्ममये दकार्यताज्ञानवत्तुल्यकार्ययागविषय इति प्रथमो बोधः ततो म[illegible]देयागविषयकं कार्यं

स्थ

न

कृ

(35)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि०

मिति द्वितीयो बोधः अयमेव च नियोज्यत्वेन पुंसोऽपूर्वेणान्वयः । अपूर्वजनिका काङ्क्षातिस्तावन्न भवति यावद्या-
गविषया न भवति कृत्यन्तरात्तदनुत्पत्तेः कृतिश्च यागविषया न तावद्भवति यावद्यागः काम्यसाधनत्वेन ज्ञायते
काम्यसाधनत्वेन ज्ञायमान एव कामिकार्यत्वे नियमादित्यतः इह विमर्शानन्तरं काम्यमानस्वर्गसाधनं स्वर्गसाधनताज्ञा-
न[illegible]जन्मकार्यताज्ञानवत्स्वर्गकामकार्यो याग इति तृतीयो बोधः । अनन्तरं अधिकारित्वेन पुरुषान्वयः । काम्यत्वनिश्चयत्व-
गे क्रियाकार्यत्वावगमात् । ततो यागकृतिः कर्तारं विनानुपपत्तेः तत्त्वानुपपत्त्या ज्ञानबलात्स्वर्गकामो यागकर्तेति तुर्यो बो-
धः । स्वर्गकामस्य इदं कार्यमहमपि स्वर्गकामस्ततो ममेदं कार्यमिति [illegible] सर्वयोगे बुद्ध्या इति बोधानं पञ्च-
मो बोधः । इह निर्विवादकतयात्तावत्तार्तीयिकी मीमांसा । अपरिपूर्तेः पञ्चैव शाब्दा नेति वदन्ति । मदंशो परागेण
बोधद्वयमानुमानिकं बोधत्रयमेव शाब्दमिति तन्न्यायः मदेशास्य ज्ञाप्ये प्रवेशेऽपि प्रथमयागविषयकं कार्यमित्येव
बोधे न तु स्वर्गकामस्य तत्र प्रवेशः । अन्योन्याश्रयापत्तेः । ततः उक्तबोधपञ्चकमिति षड्विधबोधा इत्यपि प्राहुः
स्वर्गकामनियोज्यकं यागविषयकं कार्यं स्यादिति स्वर्गसाधनत्वेन ज्ञायमानमिति प्रथमो बोधः । ननु स्वर्गसाध-
नमिति स्वर्गकामनियोज्यकत्वस्य स्वर्गकामस्येदं कार्यमिति बोधस्तत्र तयात्र ज्ञायमानस्येष्टसाधनत्वस्या-
न्वयप्रयोजकत्वाभावात् । इष्टसाधनत्वज्ञानाभावे कृतिसाध्यत्वबोधानुदयाच्चेति इदं च ज्ञानमपूर्वविषय-

न २

B5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं न तु यागविषयकं तस्यास्थिरत्वेन तत्रेष्टसाधनत्वस्य दुर्ग्रहत्वात् ततो मन्नियोज्यकं इदं कार्यं स्थायि स्वर्गसाधनत्वे
न ज्ञायमानमिति उन्नरपूर्वविषयकमदः शोपरागेण ज्ञानं द्वितीयं न तु मन्नियोज्यकं कार्यमित्याकारं ततः सर्वत्रैव का
र्यबोधे नियोज्यत्वस्थायित्वस्वर्गसाधनतानां योग्यतावच्छेदकानां भानस्यावश्यकत्वात् अश्वमेधे इति साध्यत्वे च या
गे इति साध्यत्वविनानुपपत्त्या यागविषया इति इष्टसाधनताज्ञानं विनानुपपत्त्या [illegible] दि कामी काम्यस्य तत्काम्य
साधनतया ज्ञायमानं कार्यतया वेत्तीति यागे इष्टसाधनत्वमुपादानेनावगत्य काम्यमानस्वर्गसाधनत्वेन ज्ञायमानेऽधि
कारीभूतस्वर्गकामस्य नियोज्यस्य कार्यं इत्येव तृतीयज्ञानं यागविषयकं अयमेव चाधिकारित्वेना [illegible] षः । ततो
न्तः प्रवर्ततीत्यादाविव स्वर्गकामः यागानुकूल इति प्रतीति स्वर्गकाम्यविशेष्यक इत्युक्तो बोधः ततः स्वर्गकामस्येदं
कार्यं अहमपि च स्वर्गकामः तस्मान्ममेदं स्वर्गकामस्य नियोज्यस्येदं कार्यं स्वर्गसाधनत्वेन ज्ञायमानमिति बोध प
चकमित्याहुः । केचित्तु इदानीं त्वां तन्भावेन इति साध्यताज्ञानस्य विधिना साक्षादतत्वे भवि तथा परंपरयैव निर्धिज
न्य ज्ञानस्य प्रवर्तकत्वे यागे इति साध्यताज्ञानमपि न साक्षात्किल त्वोपादानिकमनुमित्यात्मकमेवेत्याहुः । तच्चिंत्यं या
गे इति साध्यताज्ञानं विधिना जनयितुं न शक्यते नेष्टसाधनत्वस्यान्वयप्रयोजकं तथा परंपरा घटकापूर्वो
पस्थितिं विना च तद्ज्ञानासंभवात् पूर्वं ज्ञाक्रिरिति तन्मतं तत्र पारे यागे इति साध्यता बोधो न स्यादित्यर्हि कथं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तद्बोधार्थयोग्यताज्ञानसंपत्त्यर्थमिष्टसाधनताज्ञानसंपादनाया पूर्वे शक्तिरिति न ज्यानीम इति दिक् परे तु नियोज्यस्व
र्गकामीय स्वर्गसाधनत्वेन ज्ञायमानस्यापि यागस्य विषयके कार्यमिति प्राथमिको बोधः नियोज्यत्व योग्यतात्वेन स्वर्गका
मेष कार्तया स्वर्गकामस्य संसर्गतयापि भासते ततः अपूर्वे कृतिसाध्यत्वं यागे कृतिसाध्यत्वं विनानुपपन्नमिति अ
नुपपत्तिज्ञानात् प्रतीतापूर्वघटितकामस्य साधनताज्ञानसहिता त्स्वर्गकामीयः स्वर्गसाधनत्वेन जायमानयागः
कार्य इति द्वितीयो बोधः ततः कृतिराश्रयं विनानुपपन्ने त्यनुपपत्तिज्ञानात् स्वर्गकामः स्वस्य योज्यकः स्वर्गसाधन
त्वेन ज्ञायमानकार्ययागानुकूलं कृतिमान् स्वर्गकामः स्वनियोजक स्वर्गसाधनत्वेन ज्ञायमानकार्ययागानुकू
ल कृतिमान् स्वर्गकामः स्वनियोज्यं करस्वर्गसाधनत्वेन ज्ञायमानकार्ययागानुकूल व्यापारवान् इति तृतीयो
बोधः । ननु क्रियानुकूल व्यापारवत्त्वस्य कर्तृत्वरूपतया यागे स्वर्गकाम कृतिसाध्यत्वे प्रतीते तत्कर्तृत्वस्या
पि प्रतीतिजाते नितृतीय बोध वैयर्थ्यमिति चेन्न व्यापारमात्रशक्तस्याख्यातस्य व्यापारबोधकतया व्याया
रस्य कर्तृसाकांक्षत्वात् प्रथमान्तार्थ विशेष्यक बोधस्य व्युत्पत्तिसिद्धत्वाच्च अत एव तत्रैवाख्यातार्थ संख्यान्व
य इति ततश्च नानधिकृतिकर्तेति न्यायेनावगतं स्वर्गकामस्य कर्तृत्वं यागजन्यफलभोक्तृत्वरूपाधिकार
त्वं विनानुपपन्नमित्यनुपपत्तिज्ञानात् स्वर्गकामो यागजन्यफलभोक्ता इति च तुर्थो बोधः ॥ ननु श्वविधेः प्रवर्त
कत्वं प्रवर्तकज्ञानजनकं विनानुपपन्नमित्यनुपपत्तिज्ञानात् स्वर्गकामस्य यागः कार्यः स्वर्गकामो यागस्य कर्ता भोक्ता चाह

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मपि च स्वर्गकाम इति मसितत्वं धीयया यागो मत्कृतिसाध्यः अहं च यागकर्त्ता अधिकारी तिष्ठवन्तं कं पेचुं ज्ञानमुत्पद्यत इति श्रा
भाकरामतमेवं वर्णयंति। ननु पदमापूर्ववाच्यं कलिकापूर्वाणि तु कल्प्यंतीति तेषां सिद्धान्तसत्त्वं कथं संगच्छते तथा हि
अमावास्यायां अमावास्यायां यजेत पौर्णमास्यां पौर्णमास्यां यजेतेति दर्शपूर्णमासौ यागौ विहितौ। तदुत्पत्तिविधयस्तु आ
ग्नेयो ऽष्टाकपालो ऽमावास्यायां पौर्णमास्यां चाच्युतो भवति उपांशुयाजमंतरा यजेत ताभ्यामेवाग्नीषोमीय
एकादशकपालं पूर्णमासे प्रायच्छत् ऐंद्रं दधि भवत्यमावास्यायां ऐंद्रं पयो भवत्यमावास्यामित्युत्पन्नेनाग्नेय अष्टा
कपाल उपांशुयागः अग्नीषोमीय एकादशकपालः पौर्णमास्यां आग्नेयो ऽष्टाकपाल ऐंद्रं दधि योगः ऐंद्रं पयो यागः
अमावास्यायां विहिताः एतेषां दर्शपूर्णमासयागानां क्षणिकतया स्वर्गं प्रतीव परमापूर्वं प्रत्यपि साक्षाद्धेतुत्वाम
भवनेकलिकापूर्वस्यापि वाच्यत्वमुपेयमिति चेत्। अत्रोच्यते फलस्योत्कटरागगोचरतया फलमुत्पन्नक्षमफलगि
रस्कापूर्वबोधकत्वस्य विधेरेवादौ प्राप्तेः त्रिस्त्रेन च यागितेन यागे साक्षात्स्वर्गसाधनत्वस्य बोधयितुमशक्यत्वात्
रं परा घटकापूर्वयोग्यताया ज्ञानसंभवात् तत्राग्नेयादीनामेकैकमात्रस्य किं नाशितयापरमापूर्वस्वरूपव्यापारत्वे बो
धे कलिकापूर्वाणि कल्प्यंते तत्र दीक्षिते तदुत्तरं उत्पत्तिवाक्ये षण्णां आग्नेयादीनां। नियोगसाधनता बोधता वत्का
लस्थायिव्यापारकत्वरूपता च तेषां परमापूर्वसाधनत्वमिति अथ प्रधानविधिना परमापूर्वं बुद्ध्वा आग्नेयादीनां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परमापूर्वसाधनत्वाज्ञत्वन्निवाक्यैः प्रतीयते परमापूर्वसाधनतायाश्च साक्षात् संभावितत्वात् कलिकापूर्वालिकल्प
ते। इति तन्निरस्तं।। ननु तत्कथमुपपद्यते। तथाहि यथा आग्नेयादिवाक्ये तयागेन स्वर्गसाधनताबोधस्तथाप
रमापूर्वसाधनताविदुषां ज्ञानं हि यरमापूर्वमाग्नेयादीनां प्रत्येकरूपव्यापारत्वात् ततद्वारा स्वर्गसाधनता। निर्वाहो
पि कथं।। परंपराघटकापूर्वानुपस्थित्या परमापूर्वं प्रति परंपरमासाधनत्वस्याग्रहित्वात्। यागत्वावच्छिन्ने परमा
पूर्वसाधनत्वग्रहसंभवेपि परार्थतावच्छेदकाग्नेयत्वावच्छिन्ने तावत्कालस्थायिव्यापारकत्वस्याग्रहात्।। सामा
न्यतो दृष्टत्वात् तथा कल्पने कालांतरभाविफलजनकाशुविनाशित्वावच्छिन्ने फलपर्यंतस्थायिव्यापारकत्वस्या
नुभवे दृष्टत्वात् परमापूर्वस्यापि वाच्यत्वे ऽघटं स्यादिति। अत्रोपाध्यायाः व एणं षट्गुरुषं क्रियमाणानां योग
पद्यसमभवाद् योग्यताधीनसंभवतीति ततदुत्तरं चैककर्तृकत्वेवगतेः प्रथमावगतस्वर्गसाधनत्वानिर्वाहकतया
कलिकासर्वालिकल्प्यत इति तच्छुमित्यं प्रथमे तेषामेककर्तृकत्वस्याभिल्लकालीत्वेन त्वस्य च पालिपि हितत्वा
भावादिति। नवीनास्तु काम्यविधिना कार्यत्वेन परमापूर्वं बुद्धे आग्नेयादीनां कार्यत्वेनोपस्थितं प्रति हेतुताग्र
ध्यते।। कार्यस्याव्यवहितोत्तरक्षणेपि संभवात्कालांतरभावित्वप्रतिसंधानं तत्र स्वर्गस्य च देहांतरोपभो
ग्यत्वप्रतिसंधानात् नयागे साक्षात्त्वजनकत्वबोधसंभवः एवमाग्नेयादिनसाक्षात्परमापूर्वजनकत्वं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तियदेवाधकाभावश्च समानप्रकारकबाधबुद्धेरेव प्रतिबंधकत्वात् तत्तनश्च कार्यांतरजनकत्वबाधप्रतिसंधाने
परमापूर्वरूपकार्यजनकत्वमेव ग्राह्यं तच्च सर्वोदीच्यतया कालांतरीणत्वेन साक्षान्न जनकत्वासंभवात्स्वपरमे
वजनकत्वमिति कलिकापूर्वाणि कल्प्यंत इत्याहुः। अत्र च दर्शत्रिकेन कलिकापूर्वत्रिकमुत्पद्यते न एकं समु
दायापूर्वं जन्यते एवं पौर्णमासत्रिकेनाप्युत्पत्तिकलिकापूर्वत्रिकमुत्पद्यते न एकं समुदायापूर्वं जन्यते दर्शेनेन
पौर्णमासत्वेन च हेतुत्वे लाघवात्। निरपेक्षसाधनत्वस्य च तृतीयार्थत्वात् ताभ्यां च समुदायापूर्वाभ्यां फल।शिर
स्कापूर्वं स्वर्गजनकमुत्पद्यते = जन्यते = इति नव्यापूर्ववादः। तत्र केचिदाहुः। प्रथममपि तयोरंतर्गतस्य परमप्रधा

८१ नस्य साक्षादेव समुदायापूर्वजनकत्वसंभवेन उक्तैर्न कलिकापूर्वैर्मानाभावः एवं च कलिकापूर्वद्विकमुत्पद्यते न
दर्शत्रिकेन एवं कलिकापूर्वद्विकमुत्पद्यते न पौर्णमासत्रिकेन समुदायापूर्वं जन्यते ताभ्यां समुदायापूर्वाभ्यां फल
शिरस्कापूर्वं जन्यत इति साम्प्रदायिकवादः एवेति अन्ये तु यं च जन्यास्तेष्वंगेष्वत श्रुतः सः साक्षादेव परमापूर्वं जनयत्
तज्ज्ञत्वापूर्वस्वीकारेण तेन यथापूर्वसद्भावकारेण स्वाभाववदितोत्तरक्षण एव परमापूर्वजननसंभवात् यदि च स्व
डपूर्वीकारस्तदा तेषामेव साक्षात्स्वर्गजनकत्वसंभवात् कथं परमापूर्वसिद्धिः। ननु षण्णां प्रत्येकमहेतुत्वे यावि
लितानां हेतुत्वं मेलनं च पंचानामिति विवक्षितस्यापि व्यापारं विना। अन्यथा केषांचिद्व्यापारेतः कस्यचित्साक्षादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नान्यविधतया मेलनस्य प्रयोजकत्वे गौरवात् । उक्तं हृगमाद्य एवं फलस्योत्कटरागगोचरतया फलत्वेऽधिकपदसमाभिव्या
हृतप्रधानविधेरेव प्रथमप्रवृत्तत्वात् । प्रधानस्य चाशुविनाशितया परमापूर्वजनकत्वे स्थिते पश्चादुपस्थितावाक्या
नांप्रवृत्तिरितिन्तेः षडपूर्वैः प्रथमत्क्षणे कविधपरमापूर्वस्यान्यथासिद्धिः । उपजीव्यविरोधादिति चेन्न । त्क्षणवत्से
कथमविच्छिन्नकारणताकानां समाजाधीनाकार्योत्पत्तिरित्युत्तरचसाक्षान्मेलनासंभवे व्यापारकल्पनमित्येकविधमेल
नस्याकिंचित्करत्वात् । न द्वियागस्य व्यापारद्वारा मेलनमिति तज्जन्यापूर्वस्यापि व्यापारद्वारा मेलनकस्यैवचिदप्युपेतीति
तत्र दक्षिणादानस्योत्तरांगतया चरमप्रधानस्य साक्षात्परमाएवं जनकत्वासंभवात् । एवं षडपूर्वीस्वीकारेपि परमापू
र्वभावरूपकं दक्षिणाचोत्तरांगस्याक्षादेवपरमापूर्वे देतु = ननु तदुक्त न्यायप्रयोगापूर्वं कल्प्यत इति न तत्रकार्यपेक्षाष
डपूर्वीद्वारा सांगप्रधानत्वस्यैव परमापूर्वं जन्यते दक्षिणाया अंगतया स्वर्गार्जनिकायाः षडपूर्वीजन्यं परमापूर्वं प्रत्येव
जनकत्वात् क्लिप्ते वा स्तां विस्तरः । ननु दुरितापूर्वं कल्प्यं न तु वाच्यमिति तेषां सिद्धान्तः तथाच । यथायो ब्राह्मणायागुरं
ते ज्ञातेन यावच्छमादिति विधिना ब्राह्मणवधो — मस्याप्ण तन्नास्वप नरकविशेषहेतुत्वबोधानंतरं दुरितापूर्वं क^
ल्प्यते तथाकाप्यस्थलेपि स्यादिति चेन्न हेतुहेतुमतोर्लिखितत्वनुशासनबलात्पूर्वापर्यमात्रं बध्यते ननु कारण
त्वं किं त्वेतद्विधेर्निर्वर्त्तकत्वानुपपत्त्या वगोरवैणस्य नरकहेतुत्वं कल्प्यते तद्वा । दुरितापूर्वं विनानुपपन्नमिति तत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वेनेष्टत्वकार्यत्वशक्त्या लिङ्कार्यतामाह कार्यत्वं विनेष्टसाधनत्वाद्येष्टदुर्ग्रहसाधनत्वं चान्यथासिद्धिपञ्च
कराहित्येसति नियतपूर्ववर्त्तित्वरूपं कार्यसहभूतत्वघटितेकार्यसहभूतत्वं च क्षणिकस्य व्यापारघटितत्व
मिति काम्यस्थले पूर्ववाच्यतानन्तरभूतइति केचित् हेतुहेतुमतोर्लिङ्सत्त्व शासनबलात्तौर्वा पर्यमानुमद
लीनसाधारणबुध्यतेनत्वेव्यवहितपूर्ववर्तित्वंरूपकारणत्वं ततश्चसिद्धसाध्यसमभिव्याहारे सिद्धसाध्यायोप
पयुज्यत इति व्युत्पत्तिबलात्कारणत्वावगम इति न दुरितापूर्वस्य वाच्यता॥ अथवा पद्योगप्राप्यम्या भ्योनिष्टं तपो
र्वापर्यबोधानन्तरं विधेनिर्दिष्टेति हविपरत्वग्रहेतावगुदितव्यमिति विधिः कल्प्यते तेन चावगोरणाभावविषयकंका
र्यमित्यन्वयबोधः तदन्यथानुपपत्त्या चावगोरणस्यानरकहेतुत्वं कल्प्यते न हि तु गोरणस्यानिष्टसाधनत्वं विनावगो
रणाभावविषयककार्यं संभवतीति दुरितार्थं पूर्वकल्प्यमिति प्राहुः॥ ननु स्वर्गकामो यजेतेत्यादौ लिङः कार्यं श
क्रियायागादेश्चाद्य विनामितयत नेष्टसाधनत्वज्ञानासंभवात्॥ स्वर्गकाम्यनियोज्यत्वान्वययोग्यमपूर्वमेवस्व
र्गकामनियोज्यकयागविषयकंकार्यमित्यन्वयबोधे विषय इति पर्यवसितं॥ आस्तां तावदेवं काम्यस्थले यत्तु
नफलं तत्र नित्यनिषेधविधिस्थले सध्योपायनरूपक्रियायाः विषयतया न्वयाभावेपि अभेदेनैव कार्यान्वयसंभ
वात्संध्योपासनीयं कार्यमित्यन्वयबोधे क्रियाया एव कार्यपदार्थं याः प्रतीत्या नापूर्वविषयत्वमिति कथं वैदिकविधौ

52

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वत्रापूर्वबोधक इत्यत आह ॥ एवं चेति ॥ अपूर्वबोधस्यावश्यकत्वे चेत्यर्थः । काम्यस्वर्गकामो यजेतेत्यादौ नित्येऽहरहः
संध्यामुपासीतेत्यादौ निषेधे न कलंजं भक्षयेदित्यादौ अपूर्वमादौ इति लोके पचेतेत्यादौ अतत्परं लभ्यशब्दार्थतया कार्यत्व
एव शक्तिः काम्यस्थले तु काम्यकार्यं तस्य विनेष्टविनिष्टसाधनत्वग्रहवत्वेन शक्यतया क्रियायाः स्थिरतया च
तत्रेष्टसाधनता ज्ञानार्थपरं पराघटकापूर्वोपस्थितये कार्ये लिङः शक्तिः कल्प्यते तच्च कार्यविस्तृगतम् क्रियातिरि
क्तमेव वैदिकविधिजन्यबोधविषय इति निषेधविधिस्थलेऽपि क्रियातिरिक्तकार्यमेव बोधविषय इति अपूर्ववि
षय एवं सर्वत्र वैदिकविधिस्थले बोधक इत्यर्थः । इदं तु चिन्त्यं निषेधस्थले कलंजभक्षणाभावीय कार्ये [illegible]नुपपत्ते क
लंजभक्षणाभावस्य प्रागभावरूपस्य च तत्कगतत्वात् क्रियातिरिक्तस्यापेदेन कार्यान्वयसंभवात् पूर्वलोपः । योगक्षेमसा
धारणस्य कार्यत्वस्य प्रागभावेऽपि संभवादिति ननु सामान्यतो लिङ्त्वावच्छेदेन कार्ये शक्तेः पचेतेत्यादावपि कार्य
बोधस्यादित्यत आह ॥ लोके चेति अपूर्वे तात्पर्यासंभवात् । क्रियातिरिक्तकार्यबोधासंभवेन क्रियायां कार्यत्व
बोधाय तत्र लक्षणेत्यर्थः । अनन्यलभ्यस्यैव शब्दार्थत्वात् तत्र कार्यत्वेऽपि शक्तिरिति भावः । ननु लाघवाल्लोकेऽपि
कार्यत्वं शक्तिरेव हेतु कार्ये लक्षणे त्येव किं न स्यात् । तत्र पूर्वमपूर्वानुपस्थितत्वात् तत्र शक्यसंबंधरूपलक्षणाया
असंभवान्न लक्षणेति वाच्यं कार्यत्वरूपशक्यसंबंधस्य सामान्यतः कार्ये संगतेरिति मे वलाक्षणिकपदस्यानतु

43

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावकतया लिङः कार्यलक्षणा स्वीकारे ऽन्वयानुभवापत्तेः। न च गंगायां घोष इत्यत्रेव यज्यादिपदादेव बोधो ऽस्तु
इतरान्वितत्वार्थानुबोधकत्वात्। यत्र तु नाप्रसिद्धि वाच्यं वक्तृगतेतरान्वितो यः स्वार्थस्तदनुभावकत्वं पदे वेनान्वित
रांशस्यापि अन्यलभ्यत्वात् गंगायां घोष इत्यत्रापि वक्तृगतात्तीरान्वितो यो घोषस्तदनुभावकत्वं घोषपदस्य नतु ती
रस्यापि शाब्दबोधविषयत्वं तीरस्य तु संस्कारादेवोपस्थितस्य घटस्येव तया भाने शाब्दबोधोपस्थितिलक्षणे
न्निष्टे गंगापदेन तीरस्मरणं तीरेण च सह संबंधि तीरमुपस्थाप्यते तथा चासत्तेः पदजन्यपदार्थोपस्थितिरूपतया तदनु
त्पन्नत्वेन तीरशाब्दबोधासंभवात्। तत्राप्यनुपस्थितेनान्विताभिधानानभ्युपगमात्। अपूर्वस्य तु अपूर्वं भवतीति तत
यानसंस्कारबलाज्ज्ञानसंभवः। अर्थापत्त्या द्वारवादिनस्तु स्वमते पदजन्यपदार्थोपस्थितिर्नासत्तिः। एवं चायया
नीषद्रूलत्वान्वितत्वार्थबोधकत्वमिति नियमान्नीराधिकरणको घोष इति बोधानुपपत्तिः तीरस्यापि इतरप
दादेव शाब्दबोधविषयत्वमुपेयमिति यज्यादिपदादेव कार्यत्वसामान्यरूपेणोपस्थिता पूर्वबोधसंभव इति
चेत् तथापि लक्षणायां लक्षणीयविशेषणकत्वार्थविशेष्यकान्वयबोधजनकत्वनियमात्स्वर्गकामा कार्यविषयो
याग इत्येवानुभवो यजिपदेन जननीयः। न चैक आकांक्षितत्वं तस्य कार्यांशे हेतुरिति संबंधत्वप्रकारत्वेऽपि स्वर्गका
मबोधकं यागविषयकं कार्यमिति कार्यमुख्यविशेष्यकज्ञानप्रवर्त्तकत्वाभ्युपगमेनाकांक्षितत्वात्। आहार्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वस्य तल्लघुशक्तित्वरूपतया तत्र लघुशक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटरूपस्य मानाऽकार्यस्य विवेशे कार्यविशेष
णकभेदानामनिवेशे लाघवसंभवेन गुरुत्वं। विशेष्यतायां निवेशस्य तर्कसहत्वात् स्वर्गकामकार्यमित्येव ज्ञाने तु
यजिपदेन जनयितमऋकंयागाविशेषितकार्यमात्रे स्वर्गकामान्वयासंभवात्।। परं तु यागविषयककार्यवि
शेषविधेयकं तथा च यागाविशेषितकार्यबोधार्थं लिङः शक्तिरिति अथवा लौकिकलिङः क्रियाकार्यत्वे शक्तिर्वेदे
तु स्वर्गकामान्वयानुपपत्त्या क्रियातिरिक्तकार्ये शक्तिः एवं च शक्त्यवच्छेदकैक्याभावेन नानार्थता य इति दिक्
प्राभाकरमतं दूषयति। अत्रोच्यत इति। कार्यत्वस्य कृतिसाध्यत्व एव लाघवादिति कार्यत्वविशिष्टे शक्तिस्तौ फ
लैकार्यत्वांशे शक्तेरावश्यकत्वात्। नागृहीतविशेषणान्यायेन तत्रैव शक्तिरित्यर्थः।। नन्वेवं शक्तिविरहे इष्टा
नुपस्थितौ इष्टसाधनत्वप्रतीत्या स्वर्गकामकृतिसाध्यत्वान्वयबोधासंभव इत्याशंकते नन्वेवेति समाधत्ते बाध
काभावादिति। नचेति अन्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञानविरहो बाधक इत्यर्थः। अशक्यानुपस्थितत्वा
त्कामिकार्यत्वान्वयप्रयोजकरूपस्येष्टसाधनत्वस्याज्ञानात्तदन्वयबोधसंभव इति भावः। सेकेति सेकान्वय
प्रयोजकस्य द्रवद्रव्यत्वस्य करका — [illegible] वपि सत्वेन करकाभिप्रायेणाप्युक्तं पयसा सिंचतीति वाक्यमपि योग्यं स्यादिति
भावः। किं त्विति प्रकृतसंसर्गरूपत्वे योग्यता तत्त्वमुक्तं।। ननु पयसा सिंचतीत्यादौ संसर्गस्य वाक्यार्थरूपतया त

९४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानासंभवात् योग्यताज्ञानविरहात्कथं शाब्दबोध इत्यत आह तस्य चेति प्रकृतसंसर्गवत्त्वस्य चेत्यर्थः । संशये
ति संशयनिश्चयसाधारणज्ञानं शाब्दबोधहेतुरित्यर्थः । येनेति संशयासंभवेनैवं स्यात् अपूर्वे शक्तिः स्यादि
त्यर्थः लाघवात्कार्यत्वे शक्तिरवस्थाप्य इष्टसाधनत्वे शक्तिस्वीकारे पूर्वमुक्तं बाधकं निरस्यति । यद्वेति तस्य इ
ष्टसाधनत्वस्य बाधकाभावात् । लिङ्योगे इष्टसाधनताबोधने बाधकाभावादित्यर्थः । उक्तमिति आशुविनाशिनः
साक्षादसाधनतया परंपराघटकापूर्वानुपस्थित्या परंपरासाधनत्वस्यापि ग्रहासंभवात् रूपबाधकमुक्तमित्यर्थः । साध
नतेति । साधनतात्वेन रूपेण साधनताबोधः स च साक्षात्साधनत्वासंभवात् परंपरासाधनताविषयक एवेति भावः
इदं च साधनतात्वं साक्षात्परंपरासाधारणमेकमित्यभिप्रायेण यथेति रूपबाधश्चैव इत्यत्र रूपवत्त्वेनेव रूपेण नीला
दिविषयकबोध इति भावः । अथेति एकविशेषबाधे एकविशेषबाधस्थले छिद्रबाधे सच्छिद्रघटस्य जलाहर
णान्वयबाधे छिद्रेतरत्वेन घटस्य शाब्दबोधः शाब्दबोधः । छिद्रेतरेण घटेन जलमाहरेत्याकारकः । अत इति एक
विशेषबाधे शाब्दसामान्यज्ञानस्य तदितरविशेषप्रकारकत्वनियततादित्यर्थः । अत्र स्वर्गकामो यजेतेत्यत्र य
साक्षात्साधनताबाधे परंपरात्वप्रकारकं परंपरासाधनताप्रकारकं ज्ञाने कार्यलिङ्जनकत्वात्तत्र परंपरात्वप्र
कारकं परंपरात्वप्रकारकज्ञानं च बाधेति परंपरा स्वर्गसाधनत्वं हि स्वर्गजनकापूर्वजनकत्वरूपम् अपूर्वानुपस्थित्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्यदृष्टमित्यर्थः॥ वस्तुतो वस्तुगत्या तदन्वयः जलादर्शनेनदन्वयः॥ तदितरत्वे मच्छिद्रेतरत्वेन तदुपस्थापकाभावात्।
छिद्रेतरत्वोघटपदस्यघटत्वविशिष्टएव शक्तेरिति भावः॥ ननु घटपदस्य छिद्रेतरत्वविशिष्टे लक्षणेत्यतआह।
न चेति तदुपस्थितिः। छिद्रे तरत्वोपस्थिति। मानेति वस्तुगत्या छिद्रेतरघटस्यान्वयेनैवोपपत्तेरिति भावः॥ किमिति। सा
क्षात्वसाक्षादन्यसाधनतात्वरूपेण बोधे विपरंपरासाधनतात्वेनरूपेण बोधान्नाप्यूर्वं वाच्यतेति भावः। बाधकः सा
क्षादन्यसाधनतात्वरूपेण बोधे विपरंपरा साधनताबोधे बाधकः। तथाज्ञानं फलपर्यंतस्थायि व्यापारजनकत्वे
ज्ञानं संभवतीति व्यापारानुपस्थितेरित्यर्थः। ननु नेनमिति। एवंअपूर्वे शक्तिविरहे तत्कालेतितत्कालस्थायी फ
लपर्यंतस्थायी भावरूपो व्यापारस्तत्कत्वं आप्तेरित्यर्थः। यागध्वंसस्य व्यापारत्वनिरासस्य भावेति तद्वक्तुमिति
चिरध्वस्तं अति शयेविना व्यापारं विनाफलाय शालोतरेष्माविफलाय तक्षलेन समर्थं यथानुभवेन स्मृतौ जन
नीयायां संस्कारो व्यापार इति ननु तथाप्यपूर्वमानाभावाद्यागध्वंसस्यैव व्यापारत्वसंभवात्। व्यासेत्वभावव्यापार
कत्वघटितत्वेऽपयोजकत्वेन व्यापारमात्रे सिद्धेरिति। न चस्वर्गध्वंसयागआपत्तिः मन्मते चरमफलस्यापूर्वनाशकत्वो
पगमेन व्यापाराभावादेव तदनुदयादिति वाच्यं उपांत्यफलध्वंसस्य फलप्रतिबंधकत्वोपगमात् चरमफल
स्यापूर्वनाशकत्वकल्पनापेक्षया स्वल्पलघुत्वात्। एवंफलजनक तन्नदितरकारणस्य तद्व्यंदनसंयोगस्य तन्नाशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेस्वासत्ता देवनधारायाऽआपत्तिः नचसामग्रीसंपादकस्यादृष्टस्यसत्वात्तस्याप्यापत्तिरितिवाच्यं तत्रादृष्टकारण
प्रतितत्रादृष्टकारणेतराभावेनदृष्टकारणसंपत्तेरभावादिति। नचकारणीभूताभावप्रतियोगित्वंप्रतिबंधक
त्वमितियागस्यप्रतिबंधकत्वापत्तिरितिवाच्यं। अभावत्वेनकारणत्वस्यैवप्रतिबंधकत्वशरीरनिविष्टत्वात्।
अत्रध्वंसत्वेनकारणतयातथात्वात्। नचकर्मनाशाजलस्पर्शात्करतोयाविलंघनात् गंडकीबाहूतरणात्धर्मः
क्षरतिकीर्तनादितिश्रुतेः कृतेपर्णादौ तत्कीर्तनेचसतिस्वर्गादिफलाभावः। सर्वसिद्धः सचभवन्मतेनुपपन्नः
कीर्तनेनयागस्यनष्टत्वादेवानाशात्। ध्वंसस्यचध्वंसासंभवात्। अपूर्वस्वीकारेचकीर्तनेनापूर्वनाशादुपपद्य
तएवेतिवाच्यं। तत्रकीर्तनादीनांफलप्रतिबंधकत्वोपगमात्। धर्मः यागादिःकीर्तनात्क्षरतिफलभाक्नभ
वतीत्यर्थकरणादिति अत्राहुः। कीर्तनादीनांनाशुद्धिनाशित्वयाफलप्रतिबंधकत्वासंभवादपूर्वस्वीकारः
आवश्यकएवनचकीर्तनादीनांप्रतिबंधकत्वंकिंतुकीर्तनप्रागभावविशिष्टोयागःस्वर्गहेतुरितिवाच्यं
कीर्तनसत्वेपिया   तरीयकीर्तनप्रागभावविशिष्टयागात्फलापत्तेः। तत्क्रियोद्देश्यककीर्तनप्राग
भावविशिष्टत्वक्रियात्वेनहेतुत्वेयत्क्रियायांकीर्तनमप्रसिद्धं तत्रफलाभावप्रसंगः तस्याःकारणताव
च्छेदकताक्रांतत्वात्। अथकीर्तनेध्वंससंबंधेनप्रतिबंधकमितिचेन्न। अश्वमेधजन्यस्वर्गप्रतिअश्वमेधः

K.K.S.U. LIBRARY RAMTEK 441 106 Dist Nagpur M-890

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=15.10.20 17:32
,TRANSFERRED=2020/10/15 at 17:37:43
,PAGES=48
,TYPE=STD
,NAME=S0004028
,Book Name=M-890-TARKPRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection